## <u>अदादिगणे हलन्तधातवः</u>

अदादिगणे ७२ धातवः सन्ति | तेषु ४५ धातवः अजन्ताः, २७ धातवः हलन्ताः च | ४५ अजन्तधातवः अस्माभिः परिशीलिताः पूर्वतने पाठे; अधुना २७ हलन्तधातवः अवलोकयिष्यन्ते |

यथा सर्वेषु गणेषु, अदादिगणेऽपि कर्त्रर्थके सार्वधातुकप्रत्यये परे, **कर्तरि शप्** इत्यनेन शप् विहितः अस्ति | तदा **अदिप्रभृतिभ्यः शपः** (२.४.७२) इत्यनेन शपः लुक् (लोपः) भवति | अनुवृत्ति-सहितसूत्रम्— **अदिप्रभृतिभ्यः शपः लुक्** | शपः लुक् भवति अतः अदादिगणे कोऽपि विकरणप्रत्ययः न दृश्यते | शपः लुक् इत्यस्मिन् प्रसङ्गे स्मर्यतां यत् लुक् इत्युक्ते लोपः एव, नाम शप्-विकरणप्रत्ययः अपगच्छति | परञ्च लोप-लुक् इत्यनयोः कश्चन भेदः अस्ति; भेदः अयं यत् कस्यचित् प्रत्ययस्य लोपः यदा भवति, तदा लुप्तप्रत्ययः यद्यपि न दृश्यते, तथापि कार्यं करोति | परन्तु प्रत्ययस्य लुक् भवति चेत्, प्रत्ययलोपे प्रत्ययलक्षणं नास्ति इत्यस्मात् किमपि कार्यं तेन न भवति | लुकि सति, यस्मात् अङ्गात् प्रत्ययः लुप्तः जातः, तस्मिन् अङ्गे सः लुप्तप्रत्ययः तदानीम् अङ्गकार्यस्य निमित्तं न भवितुम् अर्हति |

अदादिगणे विकरणप्रत्ययस्य लुक् भवति अतः धातोः साक्षात् परे तिङ्प्रत्ययाः विहिताः भवन्ति | यथा पा + ति → पाति | पूर्वम् अदादिगणस्य अजन्तधातवः अवलोकिताः; तत्र अच्-वर्णः अन्ते आसीत् अतः एकं मुख्यं कार्यं गुणकार्यं, यथा इ + ति → एति | अस्मिन् पाठे अदादिगणस्य हलन्तधातवः परिशीलयिष्यन्ते | अत्र धात्वन्ते हल्-वर्णः अस्ति अतः एकं मुख्यं कार्यं सन्धिकार्यम् |

स्मर्यते यत् हलन्तधातुरूपाणि भिन्नरीत्या सिध्यन्ति अदादिगणे, जुहोत्यादिगणे, रुधादिगणे च यतः तत्र धातोः तिङ्-प्रत्ययस्य च साक्षात् सम्पर्कः | अदादिगणे, जुहोत्यादिगणे, रुधादिगणे च हलन्तधातुभ्यः यदा हलादि-प्रत्ययः विहितः, तदा हल्-सन्धिः सम्भवति इति ज्ञायते | स्मरन्तु यत् प्रत्ययः अजादि-वर्णैः आरभ्यते, तदा धातुः हलन्तः चेदपि हल्-सन्धिः न भवति (केवलं वर्ण-सम्मेलनं भवति) | प्रत्ययः य्, र्, व्, म्, न् इत्येभिः हल्-वर्णैः आरभ्यते चेत् आधिक्येन हल्-सन्धिः न भवति | प्रत्ययः त्, थ्, ध्, स् इत्येभिः वर्णैः आरभ्यते, तस्यामेव दशायां हल्-सन्धिः भवति | हल्-सन्धयः कीदृशाः, अपि च कार्यं कीदृशम् इति पूर्वतनेषु हल्सन्धिपाठेषु विस्तरेण अवलोकितम् | अतः अधुना एतत् हल्-सन्धि-विज्ञानं मनसि निधाय अग्रे सरेम, सर्वान् अदादौ स्थितान् हलन्तधातून् परिशीलयाम |

वयं जानीमः यत् सार्वधातुकप्रकरणे दश धातुगणाः गणसमूहद्वये विभक्ताः अङ्गस्य अन्तिमवर्णस्य अनुसारम् | येषु धातुगणेषु अङ्गम् अदन्तं भवति, ते धातुगणाः प्रथमगणसमूहे वर्तन्ते | येषु धातुगणेषु अङ्गम् अनदन्तं भवति, ते धातुगणाः द्वितीयगणसमूहे वर्तन्ते इति | सामान्यतया धातुगणेषु विकरणप्रत्ययाः सन्ति; तत्र विकरणप्रत्ययस्य अन्तिमवर्णः एव अङ्गस्य अन्तिमवर्णः | यथा भ्वादौ शप् इति विकरणप्रत्ययः; भू-धातोः भव इत्यङ्गम्; अङ्गस्य अन्तिमवर्णः ह्रस्व-अकारः (शपः एव अन्तिमवर्णः) | अतः अङ्गम् अदन्तम् इति | स्वादौ श्नु इति विकरणप्रत्ययः; चि-धातोः चिनु इत्यङ्गम्; अङ्गस्य अन्तिमवर्णः उकारः (श्नोः एव अन्तिमवर्णः) | अतः अङ्गम् अनदन्तम् इति | अदादौ विकरणप्रत्ययस्तु नास्त्येव; अदादौ धातुः एव अङ्गम् अतः धातोः यः अन्तिमवर्णः, स एव अङ्गस्यापि | अदादौ अस्-धातुः सकारान्तम् (अतः अङ्गमपि सकारान्तं), पा-धातुः आकारान्तम् (अतः अङ्गमपि आकारान्तं), यु-धातुः उ-कारान्तम् (अतः अङ्गमपि उकारान्तम्) | अदादौ यथा धातुः तथा अङ्गम् | अपि च अदादौ अकारान्तधातवः न सन्त्येव, अतः सर्वाणि अङ्गानि अनदन्तानि | अत एव अदादिगणः द्वितीयगणसमूहे वर्तते | अदादिगणः द्वितीयगणसमूहे अस्ति, अतः तिङ्-प्रत्ययाः तत्रत्याः एव | अस्मिन् पाठे पुनः द्वितीयगणसमूहस्य तिङ्-प्रत्ययाः दत्ताः |

पूर्वमेव अस्माभिः ज्ञातं यत् सार्वधातुकलकारेषु क्रियापदस्य निर्माणार्थं त्रीणि सोपानानि सन्ति—
१. विकरणप्रत्यय-निमित्तकम् अङ्गकार्यम्, तदा धातु-विकरणप्रत्यययोः मेलनम्
२. तिङ्प्रत्यय-सिद्धिः
३. तिङ्प्रत्यय-निमित्तकम् अङ्गकार्यं, तदा अङ्ग-तिङ्प्रत्यययोः मेलनम्

<u>१. विकरणप्रत्यय-निमित्तकम् अङ्गकार्यम्, तदा धातु-विकरणप्रत्यययोः मेलनम्</u>

कुत्रापि किमपि कार्यं नास्ति यतः शप्-विकरणप्रत्ययस्य लुक् भवति अतः शप् न दृश्यते न वा अङ्गकार्यस्य निमित्तं भवति |

<u>२. तिङ्प्रत्यय-सिद्धिः</u>

अदादिगणे अङ्गम् अनदन्तम्, अतः अनदन्ताङ्गानां कृते सिद्ध-तिङ्प्रत्ययाः भवन्ति |

<u>परस्मैपदम्</u> <u>आत्मनेपदम्</u>

लट्-लकारः

| | |
|---|---|
| **ति** तः अन्ति | ते आते अते |
| **सि** थः थ | से आथे ध्वे |
| **मि** वः मः | ए वहे महे |

लोट्-लकारः

| | |
|---|---|
| **तु**, तात् ताम् अन्तु | ताम् आताम् अताम् |
| हि, तात् तम् त | स्व आथाम् ध्वम् |
| **आनि आव आम** | **ऐ आवहै आमहै** |

लङ्-लकारः

| | |
|---|---|
| **त्** ताम् अन् | त आताम् अत |
| **स्** तम् त | थाः आथाम् ध्वम् |
| **अम्** व म | इ वहि महि |

विधिलिङ्-लकारः

| | |
|---|---|
| यात् याताम् युः | ईत ईयाताम् ईरन् |
| याः यातम् यात | ईथाः ईयाथाम् ईध्वम् |
| याम् याव याम | ईय ईवहि ईमहि |

३. तिङ्प्रत्यय-निमित्तकम् अङ्गकार्यं, तदा अङ्ग-तिङ्प्रत्यययोः मेलनम्

अस्मिन सोपाने सर्वप्रथमं तिङ्प्रत्यय-निमित्तकम् अङ्गकार्यम् | तदा एव सन्धिकार्यम् |

a) अङ्गकार्यम्
अङ्गकार्ये किं किं सम्भवति इति एकवारं चिन्तनीयम् | अस्मिन् पाठे सर्वे धातवः हलन्ताः, अतः **सार्वधातुकार्धधातुकयोः** इत्यस्य प्रसक्तिः नास्त्येव | स्मर्यतां, सूत्रार्थः एवम्—इगन्त-धातोः अनन्तरं सार्वधातुकप्रत्ययः अथवा आर्धधातुकप्रत्ययः अस्ति चेत्, इगन्तस्य अङ्गस्य गुणः भवति | यथा भू + शप् → भो + अ | तादृशकार्यम् अस्मिन् पाठे न कुत्रापि भविष्यति यतोहि धातुः हलन्तः; इगन्तधातुः अत्र नैव भवति | परन्तु अस्मिन् पाठे कुत्रचित् उपधायां लघु इक् वर्तते, अतः तादृशेषु स्थलेषु **पुगन्तलघूपधस्य च** इत्यनेन उपधायां गुणकार्यम् | यथा विद्-धातुः + ति → वेद् + ति | अन्यच्च कुत्रचित् विशिष्टसूत्रेण उपधायाः वृद्धिरादेशो भवति | यथा मृज् + ति → मार्ज् + ति |

b) सन्धिकार्यम्
यदा तिङ्प्रत्यय-निमित्तकम् अङ्गकार्यं समाप्तं, तदा अङ्ग-तिङ्प्रत्यययोः मेलनं क्रियते | यदा मेलनं भवति, तदा कस्यचित् सन्धिकार्यस्य प्राप्तिरस्ति चेत्, अस्मिन् समये क्रियताम् | अधुनैव पूर्वतनेषु हल्-सन्धि-पाठेषु यत् हल्-सन्धिकार्यम् अधीतं, तत् साधनीयम् | कानिचन प्रसिद्धसूत्राणि मनसि स्युः—

परस्मैपदस्य लोटि—
**हुझल्भ्यो हेर्धिः** (६.४.१०१) = हु-धातुतः झलन्तेभ्यः धातुभ्यश्च हि-प्रत्ययस्य स्थाने धि-आदेशो भवति | **येनविधिस्तदन्तस्य** (१.१.७२) इत्यनेन झलेभ्यः इति विशेषणेन तेभ्यः अङ्गेभ्यः येषाम् अन्ते झल् | हुश्च झलश्च तेषामितरेतरद्वन्द्वो हुझलः, तेभ्यो हुझल्भ्यः | हुझल्भ्यः पञ्चम्यन्तं, हेः षष्ठ्यन्तं, धिः प्रथमान्तं, त्रिपदमिदं सूत्रम् | **अङ्गस्य** (६.४.११) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **हुझल्भ्यः अङ्गेभ्यः हेः धिः** |

परस्मैपदस्य लङि—
**अपृक्त एकाल् प्रत्ययः** (१.२.४१) = यस्य प्रत्यस्य एकैव अल्, तस्य अपृक्त-संज्ञा भवति | एकश्चासौ अल् एकाल्, कर्मधारयः | अपृक्तः प्रथमान्तम्, एकाल् प्रथमान्तं, प्रत्ययः प्रथमान्तं, त्रिपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णम्— **एकाल् प्रत्ययः अपृक्तः** |

**हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** (६.१.६७) = हलन्तात्, दीर्घङ्यन्तात्, दीर्घाबन्तात् च सु-ति-सि इत्येषाम् अपृक्तसंज्ञकस्य हलः

लोपः | अनेन प्रथमाविभक्तौ सु इत्यस्य स्–लोपः, लङि प्रथमपुरुषे त्–लोपः, मध्यमपुरुषे स्–लोपश्च | हल् च ङी च आप् च तेषाम् इतरेतरद्वन्द्वः हल्ङ्यापः, तेभ्यः हल्ङ्याब्भ्यः | सुश्च, तिश्च, सिश्च तेषां समाहारद्वन्द्वः, सुतिसि, सुतिसिनः अपृक्तं सुतिस्यपृक्तम् | हल्ङ्याब्भ्यः पञ्चम्यन्तं, दीर्घात् पञ्चम्यन्तं, सुतिस्यपृक्तं प्रथमान्तं, हल् प्रथमान्तम्, अनेकपदमिदं सूत्रम् | **लोपो व्योर्वलि** (६.१.६५) इत्यस्मात् **लोपः** इत्यस्य अनुवृत्तिः; अत्र कर्मणि प्रयोगे **लुप्यते** इति रूपविकारः | अनुवृत्ति–सहितसूत्रम्— **दीर्घात् हल्ङ्याब्भ्यो सुतिसि अपृक्तं हल् लुप्यते** |

सर्वेषु लकारेषु इमानि अधःस्थानि सूत्राणि प्रवर्तन्ते | धेयं यत् इमानि सर्वाणि त्रिपाद्यं सन्ति, अतः पूर्वत्रासिद्धम् इत्यनेन पूर्वसूत्रं चेत् पूर्वकार्यम्, अपि च परसूत्रं चेत् परकार्यम् | नाम यत् सूत्रं सङ्ख्या–क्रमेण प्रथमं आयाति, तस्य कार्यं पूर्वं भवति | अतः सूत्र–क्रमेण सर्वाणि दर्शितानि अत्र—

– **संयोगान्तस्य लोपः** (८.२.२३) = यस्य पदस्य अन्ते संयोगोऽस्ति, तस्य पदस्य अन्तिमवर्णस्य लोपो भवति | **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अन्तिमवर्णस्य एव लोपः न तु पूर्णपदस्य | संयोगः अन्ते अस्ति यस्य तत् संयोगान्तं, बहुव्रीहिः, तस्य संयोगान्तस्य | संयोगान्तस्य षष्ठ्यन्तं, लोपः प्रथमान्तं, द्विपदमिदं सूत्रम् | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **संयोगान्तस्य पदस्य लोपः** |
– **धि च** (८.२.२५) = सकारस्य लोपो भवति धकारादि–प्रत्यये परे | धि सप्तम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **रात्सस्य** (८.२.२४) इत्यस्मात् **सस्य** इत्यस्य अनुवृत्तिः | **संयोगान्तस्य लोपः** (८.२.२३) इत्यस्मात् **लोपः** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **धि च सस्य लोपः** |
– **स्कोः संयोगाद्योरन्ते च** (८.२.२९) = संयोगस्य प्रथमसदस्यः सकारः ककारः वा चेत्, संयोगस्य प्रथमसदस्यलोपो भवति न तु द्वितीयसदस्यस्य, झलि पदान्ते च | स् च क् च तयोरितरेतरद्वन्द्वः स्कौ, तयोः स्कोः | संयोगस्य आदि संयोगादि, तयोः संयोगाद्योः, षष्ठीतत्पुरुषः | **संयोगान्तस्य लोपः** (८.२.२३) इत्यस्मात् **लोपः** इत्यस्य अनुवृत्तिः | **झलो झलि** (८.२.२६) इत्यस्मात् **झलि** इत्यस्य अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **संयोगाद्योः स्कोः लोपः झलि पदस्य अन्ते च** |
– **चोः कुः** (८.२.३०) = चवर्गस्य स्थाने कवर्गादेशो भवति पदान्ते झलि च | चोः षष्ठ्यन्तं, कुः प्रथमान्तं, द्विपदमिदं सूत्रम् | **झलो झलि** (८.२.२६) इत्यस्मात् **झलि** इत्यस्य अनुवृत्तिः | **स्कोः संयोगाद्योरन्ते च** (८.२.२९) इत्यस्मात् **अन्ते**, **च** इत्यनयोः अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **चोः कुः झलि पदस्य अन्ते च** |
– **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) = व्रश्च्, भ्रस्ज्, सृज्, मृज्, यज्, राज्, भ्राज्, छकारान्ताः शकारान्ताः चैषां धातूनाम् अन्तिमवर्णस्य स्थाने षकारादेशो भवति झलि पदान्ते च | **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अन्तिमवर्णस्य एव स्थाने षकारादेशः, न तु पूर्णपदस्य | व्रश्चश्च भ्रस्जश्च सृजश्च मृजश्च यजश्च राजश्च भ्राजश्च छश्च श् च तेषामितरेतरद्वन्द्वः व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशः, तेषां व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशाम् | व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षष्ठ्यन्तं, षः प्रथमान्तं, द्विपदमिदं सूत्रम् | अत्र '**जच्छशां**' इति भागे **छे च** (६.१.७३) इत्यनेन तुक्–आगमे सति जत्छशां, तदा श्चुत्वसन्धौ जच्छशां | **झलो झलि** (८.२.२६) इत्यस्मात् **झलि** इत्यस्य अनुवृत्तिः | **स्कोः संयोगाद्योरन्ते च** (८.२.२९) इत्यस्मात् **अन्ते**, **च** इत्यनयोः अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः झलि पदस्य अन्ते च** |
– **झलां जशोऽन्ते** (८.२.३९) = पदान्ते झलः स्थाने जशादेशो भवति | पदात् परे कोऽपि वर्णः स्यात् वा न वा, सूत्रस्य प्रसक्तिः अस्ति एव | पदात् परे अच् स्यात् हल् स्यात् वा, सूत्रस्य प्रसक्तिः अस्ति एव | बाधकसूत्रम् अस्ति चेत् अन्या वार्ता | झल् प्रत्याहारे पञ्चमवर्गीय–व्यञ्जनानि वर्जयित्वा सर्वाणि वर्गीयव्यञ्जनानि (नाम अननुनासिक–वर्गीयव्यञ्जनानि), अपि च श्, ष्, स्, ह् | प्रयोगे वर्गाणां प्रथमः, द्वितीयः, तृतीयः, चतुर्थश्च वर्णाः आयान्ति | जश् प्रत्याहारे वर्गाणां तृतीयवर्णाः—ज्, ब्, ग्, ड्, द् इति | **स्थानेऽन्तरतमः** (१.१.५०) इत्यनेन कवर्गीयाणां स्थाने गकारः, चवर्गीयाणां स्थाने जकारः, तवर्गीयाणां स्थाने दकारः, टवर्गीयाणां स्थाने डकारः, पवर्गीयाणां स्थाने बकारः इति | झलां षष्ठ्यन्तं, जशः प्रथमान्तम्, अन्ते सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | **पदस्य** (८.१.१६) इत्यस्य अधिकारः || तर्हि पदस्य अन्ते झल्–प्रत्याहारे कश्चन वर्णः अस्ति चेत्, स्थाने तस्य वर्गस्य तृतीयवर्णादेशः भवति | अयं जश्त्वसन्धिः इत्युच्यते | अनुवृत्ति–सहितसूत्रम्— **पदस्य अन्ते झलां जशः** |
– **षढोः कः सि** (८.२.४१) = सकारे परे षकारस्य ढकारस्य च ककारादेशो भवति | षश्च ढश्च तयोः इतरेतरद्वन्द्वः षढौ, तयोः षढोः | षढोः षष्ठ्यन्तं, कः प्रथमान्तं, सि सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णम्— **षढोः कः सि** |
– **नश्चापदान्तस्य झलि** (८.३.२४) = अपदान्तस्य नकारस्य मकारस्य च स्थाने अनुस्वारादेशो भवति झलि परे | झल्–प्रत्याहारे वर्गस्य प्रथमः, द्वितीयः, तृतीयः, चतुर्थः च वर्णाः अपि च श्, ष्, स्, ह् इति वर्णाः अन्तर्भूताः | पदस्य अन्तः पदान्तः, न पदान्तः अपदान्तः तस्य अपदान्तस्य | नः षष्ठ्यन्तं, च अव्ययपदम्, अपदान्तस्य षष्ठ्यन्तं, झलि सप्तम्यन्तं, अनेकपदमिदं सूत्रम् | **मोऽनुस्वारः** (८.३.२३) इत्यस्मात् **मः**, **अनुस्वारः** इत्यनयोः अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अपदान्तस्य मः नः च अनुस्वारः झलि संहितायाम्** |
– **आदेशप्रत्यययोः** (८.३.५९) = इण्–प्रत्याहारात् कवर्गीयात् च परे अपदान्तः आदेशरूपी प्रत्ययावयवो वा सकारः अस्ति चेत्, तस्य सकारस्य स्थाने षकारादेशो भवति | आदेशः तु मूर्धन्यवर्णस्य इत्येव उक्तं, परं **स्थानेऽन्तरतमः** इत्यनेन ट्, ठ्, ड्, ढ्, ण्, ष् इत्येषु

मूर्धन्यवर्णेषु षकारस्य नैकट्यम्, अतः षकारः एव आदिष्टः भवति। नुम्, विसर्गः, शर्-प्रत्याहारस्थ-वर्णः एषु अन्यतमः मध्ये अस्ति चेदपि कार्यं भवति। इण्-प्रत्याहरे इमे वर्णाः अन्तर्भूताः— इ, उ, ऋ, ऌ, ए, ओ, ऐ, औ, ह, य, व, र, ल। अस्य कार्यस्य नाम षत्वविधिः। आदेशश्च प्रत्ययश्च आदेशप्रत्ययौ, तयोः आदेशप्रत्यययोः इतरेतरद्वन्द्वः। षष्ठ्यन्तम् एकपदमिदं सूत्रम्। **सहे साडः सः** (८.३.५६) इत्यस्मात् **सः** इत्यस्य अनुवृत्तिः। **नुंविसर्जनीयशर्व्यवायेऽपि** (८.३.५८) इत्यस्य पूर्णा अनुवृत्तिः। **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः। **इण्कोः** (८.३.५७), **अपदान्तस्य मूर्धन्यः** (८.३.५५) इत्यनयोः अधिकारः। अनुवृत्ति-सहितसूत्रम्— **इण्कोः आदेशप्रत्यययोः अपदान्तस्य सः मूर्धन्यः संहितायां, नुंविसर्जनीयशर्व्यवायेऽपि**।

– **रषाभ्यां नो णः समानपदे** (८.४.१) = रेफषकाराभ्यामुत्तरस्य नकारस्य णकारादेशो भवति, समानपदस्थौ चेदेव निमित्तनिमित्तिनौ भवतः।

– **अट्कुप्वाङ्नुम्व्यवायेऽपि** (८.४.२) = अट्, कवर्गः, पवर्गः, आङ्, नुम् इत्येतैः यथासम्भवं मिलितैः व्यवधानेऽपि नस्य णः स्यात् समानपे। **रषाभ्यां नो णः समानपदे** (८.४.१) इति सूत्रस्य पूर्णतया अनुवृत्तिः।

– **ष्टुना ष्टुः** (८.४.४१) = दन्त्यसकारस्य तवर्गीयवर्णस्य च स्थाने मूर्धन्यषकारादेशः टवर्गीयवर्णादिशश्च भवतः, मूर्धन्यषकार-टवर्गीयवर्णयोः योजनेन।

– **झलां जश् झशि** (८.४.५३) = झलां स्थाने जशादेशो भवति झशि परे। **स्थानेऽन्तरतमः** (१.१.५०) इत्यनेन जश्-वर्णेषु वर्णनिर्धारणम्। झलां षष्ठ्यन्तं, जशः प्रथमान्तम्, झशि सप्तम्यन्तं, त्रिपदमिदं सूत्रम्। झश्-प्रत्याहारे वर्गाणां तृतीयचतुर्थाः च वर्णाः अन्तर्भूताः। **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः। अनुवृत्ति-सहितसूत्रम्— **झलां जश् झशि संहितायाम्**।

– **खरि च** (८.४.५५) = झलः स्थाने चरादेशो भवति खरि परे। खरि सप्तम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम्। **झलां जश् झशि** इत्यस्मात् **झलां** इत्यस्य अनुवृत्तिः; **अभ्यासे चर्च** इत्यस्मात् **चर्च** इत्यस्य अनुवृत्तिः। **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः। अनुवृत्ति-सहित-सूत्रमेवम्— **झलां चर् खरि च संहितायाम्**।

– **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) = अनुस्वारस्य स्थाने परसवर्णादिशो भवति ययि परे। परस्य सवर्णः, परसवर्णः, षष्ठी तत्पुरुषः। अनुस्वारस्य षष्ठ्यन्तं, ययि सप्तम्यन्तं, परसवर्णः प्रथमान्तं, त्रिपदमिदं सूत्रम्। यय्-प्रत्याहारे श्, ष्, स्, ह् एतान् वर्जयित्वा सर्वे हल्-वर्णाः अन्तर्भूताः। **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः। अनुवृत्ति-सहितसूत्रम्— **अनुस्वारस्य ययि परसवर्णः संहितायाम्**।

– **वाऽवसाने** (८.४.५६) = अवसाने झलः विकल्पेन चर्-आदेशो भवति। अनेन अवसानावस्थायां विकल्पेन जश्त्वं चर्त्वं वा। वा अव्ययपदम्, अवसाने सप्तम्यन्तं, द्विपदमिदं सूत्रम्। **झलां जश् झशि** (८.४.५३) इत्यस्मात् **झलां** इत्यस्य अनुवृत्तिः। **अभ्यासे चर्च** (८.४.५४) इत्यस्मात् **चर्** इत्यस्य अनुवृत्तिः। अनुवृत्ति-सहितसूत्रम्— **अवसाने झलां चरो वा**।

– **झरो झरि सवर्णे** (८.४.६५) = हल्-उत्तरस्य झरः विकल्पेन लोपः सवर्णझरि परे। झरः षष्ठ्यन्तं, झरि सप्तम्यन्तं, सवर्णे सप्तम्यन्तं, त्रिपदमिदं सूत्रम्। **हलो यमां यमि लोपः** (८.४.६४) इत्यस्मात् **हलः**, **लोपः** चेत्यनयोः अनुवृत्तिः। **झयो होऽन्यतरस्याम्** (८.४.६२) इत्यस्मात् **अन्यतरस्याम्** इत्यस्य अनुवृत्तिः। **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः। अनुवृत्ति-सहितसूत्रम्— **हलः झरः लोपः अन्यतरस्यां सवर्णे झरि संहितायाम्**।

एषां प्रसक्तिर्यत्र यत्र भवति, तत्र तत्र अस्माभिः तत्तत् सन्धिकार्यं करणीयमेव। अनेन हलन्तधातवः द्रष्टव्याः। धेयं यत् पूर्वतनेषु हल्-सन्धि-पाठेषु, हल्-सन्धयः परिशीलिताः केन क्रमेण ? प्रत्ययस्य प्रथमवर्णम् अनुसृत्य। अधुना अस्माकं कार्यं प्रवर्तते धातोः अन्तिमवर्णम् अनुसृत्य। कार्यं तदेव, परन्तु धातुक्रमेण अग्रे सरेम—

<u>चकारान्तः वच्-धातुः</u> (परस्मैपदी, परिभाषणे)

a) अङ्गकार्यम्— उपधायां ह्रस्व-अकारः (लघु इक् इति न) अतः अङ्गकार्यं नास्ति।
b) सन्धिकार्यम्—

- **चोः कुः** (८.२.३०) इति कुत्वे वच् + ति → वक्ति
- प्रत्ययः अजादिः, अथवा प्रत्ययः य्, र्, व्, म्, न् इत्येभिः हल्-वर्णैः आरभ्यते, तदा धातुः हलन्तः चेदपि हल्-सन्धिः न भवति (केवलं वर्ण-सम्मेलनं भवति)
- **आदेशप्रत्यययोः** (८.३.५९) इत्यनेन कवर्गीयात् परे प्रत्ययावयव-सकारस्य स्थाने षकारादेशो भवति। वच् + सि → **चोः कुः** (८.२.३०) → वक् + सि → वक्षि
- **हुझल्भ्यो हेर्धिः** (६.४.१०१) इत्यनेन झलन्तेभ्यः धातुभ्यः हि-प्रत्ययस्य स्थाने धि-आदेशो भवति

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि। उपरि दत्तानां नियमानाम् आधारेण रूप-चिन्तनं करोतु।

रूपाणि
लटि —
लोटि—
लङि—
विधिलिङि—

**नहि वचिरन्तिपरः प्रयुज्यते** इति वार्तिकम् = वच् + अन्ति— लट्–लकारे प्रथमपुरुषबहुवचने वच्–धातोः रूपं न प्रयुज्यते |
**झिपरे इत्येके** = केषाञ्चित् मते कस्मिंश्चिदपि लकारे प्रथमपुरुषबहुवचने वच्–धातोः रूपं न प्रयुज्यते |

चकारान्तः पृची → पृच् धातुः (आत्मनेपदी, सम्पर्चने)

a) अङ्गकार्यम्—
१) हलादि पित्सु = आत्मनेपदिधातुषु नास्ति एव |
२) अजादि पित्सु = उपधायां लघु–इकः गुणः | पृच् + ऐ → **पुगन्तलघूपधस्य च** → पर्च् + ऐ → वर्णमेलने → पर्चै
३) हलाद्यपित्सु = **क्ङिति च**, गुणनिषेधः | पृच् + ते → सन्धिकार्यमेव → पृक्ते
४) अजाद्यपित्सु = **क्ङिति च**, गुणनिषेधः | पृच् + आते → वर्णमेलनमेव → पृचाते

b) सन्धिकार्यम्—
- **चोः कुः** (८.२.३०) इति कुत्वे पृच् + ते → पृक्ते
- प्रत्ययः अजादिः, अथवा प्रत्ययः य्, र्, व्, म्, न् इत्येभिः हल्–वर्णैः आरभ्यते, तदा धातुः हलन्तः चेदपि हल्–सन्धिः न भवति (केवलं वर्ण–सम्मेलनं भवति)
- **आदेशप्रत्यययोः** इत्यनेन कवर्गीयात् परे प्रत्ययावयव–सकारस्य स्थाने षकारादेशो भवति | पृच् + से → **चोः कुः** (८.२.३०) → पृक् + से → पृक् + षे → पृक्षे
- धकारादिप्रत्यये परे जश्त्वम् | पृच् + ध्वे → **चोः कुः** (८.२.३०) → पृक् + ध्वे → **झलां जश् झशि** → पृग् + ध्वे → पृग्ध्वे

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

रूपाणि
लटि —
लोटि—
लङि—
विधिलिङि—

जकारान्तः णिजि → निन्ज् धातुः (आत्मनेपदी, शुद्धौ)

a) निरनुबन्धधातोः सिद्धिः—
नुमागमः | **इदितो नुम् धातोः** (७.१.५८) = इदितः धातोः नुम् आगमो भवति | इदित् इत्युक्ते इत् इत् यस्य सः | तत्र प्रथमः इत् नाम ह्रस्वः इकारः* | द्वितीयः इत् नाम इत्–संज्ञा | ह्रस्व–इकारस्य इत्–संज्ञा यस्य, सः धातुः इदित् | इत् इत् यस्य स इदित् बहुव्रीहिः, तस्य इदितः | इदितः षष्ठ्यन्तं, नुम् प्रथमान्तं, धातोः षष्ठ्यन्तं, त्रिपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णम्— **इदितः धातोः नुम्** |

***तपरस्तत्कालस्य** (१.१.७०) = तकारात् परः यः, तकारः परः यस्मात्, द्वयोः अपि समकालस्य बोधकः | तात्परः तपरः पञ्चमीतत्पुरुषः, तः परो यस्मात् सः तपरः, बहुव्रीहिः— द्वावपि अर्थौ | तस्य कालः तत्कालः (तस्य काल इव कालः यस्य स तत्कालः) षष्ठीतत्पुरुषगर्भः बहुव्रीहिः | तस्य तत्कालस्य | तपरः प्रथमान्तम्, तत्कालस्य षष्ठ्यन्तम्, द्विपदमिदं सूत्रम् | **स्वं रूपं शब्दस्याशब्दसंज्ञा** (१.१.६८) इत्यस्मात् **स्वं रूपम्** इत्यनयोः अनुवृत्तिः | **अणुदित्सवर्णस्य चाप्रत्ययः** (१.१.६९) इत्यस्मात् **सवर्णस्य** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **तपरः तत्कालस्य स्वस्य रूपस्य सवर्णस्य** |

**मिदचोऽन्त्यात्परः** (१.१.४७) = यः आगमः मित् अस्ति, सः अच्–वर्णेषु अन्त्यात् परः आयाति, अपि च अयं मित् यस्य वर्ण–समुदायस्य आगमः, तस्य अन्तिमावयवो भवति | म् इत् यस्य सः मित्, बहुव्रीहिः | मित् प्रथमान्तम्, अचः षष्ठ्यन्तम्, अन्त्यात् पञ्चम्यन्तम्, परः

प्रथमान्तम्, अनेकपदमिदं सूत्रम् | **आद्यन्तौ टकितौ** (१.१.४६) इत्यस्मात् **अन्तः** इत्यस्य अनुवृत्तिः | अस्मिन् सूत्रे 'अचः' षष्ठीविभक्तौ; "अन्त्यात् अचः" इत्यस्य अर्थः निर्धारणम्— नाम "सर्वेषु स्वरेषु अन्तिमः" | 'अचः' एकवचने चेदपि सार्वत्रिक-बहुवचनार्थकः | अत्र षष्ठीविभक्तेः अर्थः स्थाने इति न, अतः **षष्ठी स्थानेयोगा** (१.१.४९) इत्यस्य अपवादः | अनुवृत्ति-सहितसूत्रम्— **मित् अन्त्यात् अचः परः अन्तः** |

नत्वम् | **णो नः** (६.१.६४) = उपदेशावस्थायां धातोः आदौ णकारः अस्ति चेत्, णकारस्य स्थाने नकारादेशः भवति | णः षष्ठ्यन्तं, नः प्रथमान्तं, द्विपदमिदं सूत्रम् | **आदेच उपदेशेऽशिति** (६.१.४५) इत्यस्मात् **उपदेशे** इत्यस्य अनुवृत्तिः, **धात्वादेः षः सः** (६.१.६४) इत्यस्मात् **धात्वादेः** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्— **धात्वादेः णः नः उपदेशे** |

णिजि → **उपदेशेऽजनुनासिक इत्, तस्य लोपः** → **इदितो नुम् धातोः**, **मिदचोऽन्त्यात्परः** → णिन्ज् → **णो नः** → निन्ज् इति धातुः |

b) अङ्गकार्यम्— उपधायां नकारः (लघु इक् इति न) अतः अङ्गकार्यं नास्ति |
c) सन्धिकार्यम्—

निन्ज् + ते → **चोः कुः** (८.२.३०) → निन्ग् + ते → **नश्चापदान्तस्य झलि** (८.३.२४) → निंग् + ते → **खरि च** → निंक् + ते → **अनुस्वारस्य ययि परसवर्णः** → निङ्क् + ते → वर्णमेलने → निङ्क्ते
निन्ज् + आते → **नश्चापदान्तस्य झलि** (८.३.२४) → निंज् + आते → **अनुस्वारस्य ययि परसवर्णः** → निञ्ज् + आते → वर्णमेलने → निञ्जाते
निन्ज् + ध्वे → **चोः कुः** (८.२.३०) → निन्ग् + ध्वे → **नश्चापदान्तस्य झलि** (८.३.२४) → निंग् + ध्वे → **अनुस्वारस्य ययि परसवर्णः** → निङ्ग् + ध्वे → वर्णमेलने → निङ्ग्ध्वे

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप-चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

एवमेव शिजि → शिन्ज्, पिजि → पिन्ज्, वृजी → वृज् इत्यादयो जकारान्ताः

<u>जकारान्तः मृजू → मृज् धातुः</u> (परस्मैपदी, शुद्धौ)

a) अङ्गकार्यम्—

**मृजेर्वृद्धिः** (७.२.११४) = मृज्-धातोः इकः वृद्धिः भवति सार्वधातुके च आर्धधातुके च प्रत्यये परे | अङ्गकार्यत्वात् प्रत्ययः परे अस्त्येव; स च प्रत्ययः धातोः भवति इति कृत्वा सार्वधातुकः अथवा आर्धधातुकः भवेदेव | मृजेः षष्ठ्यन्तं, वृद्धिः प्रथमान्तं, द्विपदमिदं सूत्रम् | **इकोगुणवृद्धी** (१.१.३) इत्यस्मात् परिभाषासूत्रात् **इकः** इत्यस्य षष्ठ्यन्ता अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **मृजेः अङ्गस्य इकः वृद्धिः** |

१) हलादि पित्सु = **मृजेर्वृद्धिः** इत्यनेन इकः वृद्धिः | मृज् + ति → मार्ज् + ति
२) अजादि पित्सु = **मृजेर्वृद्धिः** इत्यनेन इकः वृद्धिः | मृज् + आनि → मार्ज् + आनि → मार्जानि
३) हलाद्यपित्सु = **क्ङिति च**, वृद्धिनिषेधः | मृज् + तः → मृज् + तः
४) अजाद्यपित्सु = **ङित्यजादौ वेष्यते** इत्यनेन वार्तिकेन अजादौ किति ङिति परे विकल्पेन वृद्धिः | मृज् + अन्ति → मार्ज् + अन्ति → मार्जन्ति; मृज् + अन्ति → मृजन्ति

b) सन्धिकार्यम्—

मृज् + ति → मार्ज् + ति → **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इत्यनेन जकारस्य षकारः → मार्ष् + ति → **ष्टुना ष्टुः** → मार्ष् + टि → मार्ष्टि
मृज् + तः → **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इत्यनेन जकारस्य षकारः → मृष् + तः → **ष्टुना ष्टुः** → मृष् + टः → मृष्टः
मृज् + सि → **मृजेर्वृद्धिः** (७.२.११४) → मार्ज् + सि → **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) → मार्ष् + सि → **षढोः कः सि** → मार्क् + सि → **आदेशप्रत्यययोः** → मार्क्षि

लोटि मृज् + हि → **हुझल्भ्यो हेर्धिः** इत्येनेन हि स्थाने धि-आदेशः → मृज् + धि → **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इत्यनेन जकारस्य षकारः → मृष् + धि → **ष्टुना ष्टुः** → मृष् + ढि → **झलां जश् झशि** इत्यनेन जश्त्वादेशः → मृड् + ढि → मृड्ढि

लङि अमृज् + त् → **मृजेर्वृद्धिः** (७.२.११४) → अमार्ज् + त् → **हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** इत्यनेन हल्-परतः अपृक्तसंज्ञक-प्रत्ययस्य लोपः → अमार्ज् → **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इत्यनेन पदान्तेऽपि षकारादेशः → अमार्ष् → **झलां जशोऽन्ते** इत्यनेन पदान्ते जश्त्वादेशः → अमार्ड् इति रूपम् | विकल्पेन चर्त्वादिशः **वाऽवसाने** इति सूत्रेण → अमार्ट्

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप-चिन्तनं करोतु |

रूपाणि
लटि —
लोटि—
लङि—
विधिलिङि—

डकारान्तः ईड → ईड् धातुः (आत्मनेपदी, स्तुतौ)

a) अङ्गकार्यम्—उपधायां दीर्घ-इक् अतः गुणस्य सम्भावना नैव उदेति |

b) इडागमः—

**ईडजनोर्ध्वे च** (७.२.७८) = ईड्, जन् इत्याभ्यां धातुभ्यां परस्य सार्वधातुकसंज्ञकस्य 'से' च 'ध्वे'-शब्दस्य च इडागमो भवति | इडश्च जन् च इडजनौ, तयोः इडजनोः | इडजनोः पञ्चम्यर्थे षष्ठी | ध्वे लुप्तषष्ठीकं पदं, च अव्ययम् | **इडत्त्यर्त्तिव्ययतीनाम्** (७.२.६६) इत्यस्मात् **इट्** इत्यस्य अनुवृत्तिः | **रुदादिभ्यः सार्वधातुके** (७.२.७६) इत्यस्मात् **सार्वधातुके** इत्यस्य अनुवृत्तिः | 'च' इति अव्ययेन पूर्वतनस्य **ईशः से** (७.२.७७) इत्यस्य पूर्णतया अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **ईशः ईडजनोः अङ्गात् सार्वधातुकस्य से ध्वे च इट्** |

धेयं यत् **आर्धधातुकस्येड्वलादेः** (७.२.३५) इत्यनेन इडागमः आर्धधातुकप्रत्रयस्य एव भवति इति सामान्यनियमः | **आर्धधातुकस्येड्वलादेः** (७.२.३५) = आर्धधातुक-प्रत्ययस्य आदौ वल्-प्रत्याहारे अन्यतमवर्णः अस्ति चेत्, तस्य इडागमो भवति | सार्वधातुकप्रत्ययस्य प्रसङ्गे त्रयाणाम् एव धातूनाम् इडागमः भवति— **ईशः से** (७.२.७७), **ईडजनोर्ध्वे च** (७.२.७८) इत्याभ्यं सूत्राभ्यां सार्वधातुकप्रत्ययस्य इडागमः ईश्, ईड्, जन् इति एभ्यः त्रिभ्यः धातुभ्यः | कुत्र इति चेत्, लट्-लकारस्य से, ध्वे; लोट्-लकारस्य स्व, ध्वम् च |

यथा—
लटि ईड् + से → ईड् + इट् + से → अनुबन्धलोपे → ईड् + इ + से → **आदेशप्रत्यययोः** इत्यनेन इण्-प्रत्याहारात् सकारस्य षत्वम् → ईडिषे |
लटि ईड् + ध्वे → ईड् + इट् + ध्वे → ईडिध्वे |
लोटि ईड् + स्व → ईड् + इ + स्व → **आदेशप्रत्यययोः** इत्यनेन इण्-प्रत्याहारात् सकारस्य षत्वम् → ईडिष्व |
लोटि ईड् + ध्वम् → ईड् + इट् + ध्वम् → ईडिध्वम्
लङि ईड् + ध्वम् → इडागमः न भवति → हल्-सन्धिकार्यत्वात् ष्टुत्वम् → ईड्ढ्वम्

अत्र केचन प्रश्नाः उद्यन्ति—
– यदि अनेन सूत्रेण 'से' इत्यस्य इडागमः भवति, तर्हि लोटि 'स्व' इत्यस्य इडागमः किमर्थम् ?
– यदि अनेन सूत्रेण 'ध्वे' इत्यस्य इडागमः भवति, तर्हि लोटि 'ध्वम्' इत्यस्य इडागमः किमर्थम् ?
– यदि लोटि कथञ्चित् 'ध्वम्' इत्यस्य इडागमः भवति, तर्हि लङि 'ध्वम्' इत्यस्य इडागमः किमर्थं न भवति ?

एतेषां परिहारार्थं, सम्बद्ध–सिद्धतिङ्प्रत्ययाः कथं निष्पन्नाः इति स्मरणीयाः—

<u>आत्मनेपदिधातूनां मूल–तिङ्प्रत्ययाः</u>

त आताम् झ
थास् आथाम् ध्वम्
इड् वहि महिङ्

१) थास् → लटि 'से' → लोटि 'स्व'
थास् → **थासः से** (३.४.८०) इत्यनेन टित्–लकारस्य थास्–स्थाने से–आदेशः → लटि 'से' → लोट्–लकारे **सवाभ्यां वामौ** (३.४.९१) इत्यनेन सकारात् परस्य एकारस्य 'व'–आदेशः → लोटि स्व

**थासः से** (३.४.८०) = टित्–लकारस्य थास्–स्थाने से–आदेशो भवति | थासः षष्ठ्यन्तं, से लुप्तप्रथमान्तं, द्विपदमिदं सूत्रम् | **टित आत्मनेपदानां टेरे** (३.४.७९) इत्यस्मात् **टितः** इत्यस्य अनुवृत्तिः | **लस्य** (३.४.७७) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **टितः लस्य थासः से** |

**सवाभ्यां वामौ** (३.४.९१) = लोट्–लकारस्य सकारात् वकारात् च, एकारस्य स्थाने क्रमेण व, अम् इत्यनयोः आदेशो भवति | **आमेतः** (३.४.९०) इत्यस्य अपवादः | सश्च वश्च तयोरितरेतरद्वन्द्वः सवौ, ताभ्यां सवाभ्याम् | वश्च अम् च तयोरितरेतरद्वन्द्वः वामौ | सवाभ्यां पञ्चम्यन्तं, वामौ प्रथमान्तं, द्विपदमिदं सूत्रम् | **लोटो लङ्वत्** (३.४.८५) इत्यस्मात् **लोटः** इत्यस्य अनुवृत्तिः | **आमेतः** (३.४.९०) इत्यस्मात् **एतः** इत्यस्य अनुवृत्तिः | **लस्य** (३.४.७७) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **लोटः लस्य सवाभ्यां एतः वामौ** |

२) ध्वम् → लटि 'ध्वे' → लोटि 'ध्वम्'

ध्वम् → **टित आत्मनेपदानां टेरे** (३.४.७९) इत्यनेन टित्–लकाराणाम् आत्मनेपदसंज्ञकानां प्रत्ययानां 'टि'–भागस्य स्थाने एकार–आदेशः → लटि ध्वे → **सवाभ्यां वामौ** (३.४.९१) इत्यनेन लोट्–लकारस्य एकारस्य स्थाने अम्–आदेशः → ध्वम्

**टित आत्मनेपदानां टेरे** (३.४.७९) = टित्–लकाराणाम् आत्मनेपदसंज्ञकानां प्रत्ययानां 'टि'–भागस्य स्थाने एकार–आदेशो भवति | ठितः षष्ठ्यन्तम्, आत्मनेपदानां षष्ठ्यन्तं, टेः षष्ठ्यन्तम्, ए लुप्तप्रथमान्तम्, अनेकपदमिदं सूत्रम् | **लस्य** (३.४.७७) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **टितः लस्य आत्मनेपदानां टेः ए** |

३) लङि ध्वम्
ध्वम् → लङ् ङित् न तु टित् अतः **टित आत्मनेपदानां टेरे** (३.४.७९) इत्यनेन टि–भागस्य एत्वं न भवति → मूल–ध्वम् एव तिष्ठति |

प्रत्ययानां मूलरूपं 'प्रकृतिः', परिवर्तितरूपं च 'विकृतिः' | अपि च यत्र व्युत्पत्तिमार्गे अनेकानि सोपानानि सन्ति, मध्येऽपि मूलं प्रति साधनं विकृतिः, फलं प्रति च साधनं प्रकृतिः |

प्रकृतेः ग्रहणेन विकृतेः अपि ग्रहणम् | यत्र प्रकृतौ कार्यं विधीयते, **एकदेशविकृतस्यानन्यत्वात्** इत्यनया परिभाषया विकृतौ अपि कार्यं विधीयते | एकस्मिन् देशे विकारः भवति चेत्, मूलं तदानीमपि तस्य बीजे अस्ति | छिन्नपुच्छश्वा श्वा एव | कुक्कुरस्य पुच्छः नास्ति चेदपि सः कुक्कुरः | किन्तु विकृतेः ग्रहणेन प्रकृतेः अग्रहणम् | यत्र विकृतौ कार्यं विधीयते, **विकृतिग्रहणेन प्रकृतेरग्रहणात्** इति परिभाषया प्रकृतौ तत् कार्यं न भवति |

यथा कोपि यदि वदति, 'पुरुषम् आनय', तर्हि अन्धपुरुषस्य आनयनेनापि कार्यं सिद्धम्— अन्धो वा अनन्धो वा, पुरुष एव | किन्तु कोपि

यदि वदति, 'अन्धम् आनय', तर्हि अन्धः एव आनेतव्यः; सामान्यपुरुषस्य आनयनेन कार्यं न सिध्यति | पुरुषः प्रकृतिः, अन्धः विकृतिः | प्रकृतेः ग्रहणेन विकृतेः अपि ग्रहणं, किन्तु विकृतेः ग्रहणेन प्रकृतेः अग्रहणम् |

अतः यत्र 'से' इत्यस्मिन् कार्यं भवति, तत्र 'स्व' इत्यस्मिन् अपि तदेव कार्यं भविष्यति यतोहि प्रकृतौ कार्यमस्ति चेत् विकृतौ अपि भवति | किन्तु कुत्रचित् 'स्व' इत्यस्मिन् केनचित् सूत्रेण कार्यं विधीयते, तत् कार्यं प्रकृतौ 'से' इत्यस्मिन् न भवति |

एवमेव लोटः 'ध्वम्' प्रति 'ध्वे' प्रकृतिः, अतः 'ध्वे' इत्यस्मिन् कार्यं भवति चेत्, लोटः 'ध्वम्' प्रति अपि तत् कार्यं भवति | किन्तु लङः ध्वम् तु मूल-ध्वम् | लङः ध्वम् प्रति 'ध्वे' विकृतिः न तु प्रकृतिः अतः 'ध्वे' इत्यस्य यत् कार्यं भवति, लङः 'ध्वम्' तत् कार्यं न गृह्णाति |

c) सन्धिकार्यम्—

सन्स्त् + ति → **स्कोः संयोगाद्योरन्ते च** → सन्त् + ति → **नश्चापदान्तस्य झलि** → संत् + ति → **अनुस्वारस्य ययि परसवर्णः** → सन्त् + ति → **झरो झरि सवर्णे** → सन्ति / सन्ति
सन्स्त् + अन्ति → **नश्चापदान्तस्य झलि** → संस्त् + अन्ति → संस्तन्ति
सन्स्त् + मि → **नश्चापदान्तस्य झलि** → संस्त् + मि → संस्त्मि [अत्र धेयम्—किमर्थं इमानि सूत्राणि न प्रवर्तनीयानि **स्कोः संयोगाद्योरन्ते च**, **अनुस्वारस्य ययि परसवर्णः**, **झरो झरि सवर्णे**]

लङि **हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** (६.१.६८, लघु० १७९) = अत्र हल्-परतः अपृक्तसंज्ञक-प्रत्ययस्य लोपः | लङि त्-लोपः, स्-लोपश्च |
असन्स्त् + त् → असन्स्त् → **स्कोः संयोगाद्योरन्ते च** → असन्त् → **संयोगान्तस्य लोपः** → असन्

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप-चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

अन्यच्च **ईडजनोर्ध्वे च** (७.२.७८), **ईशः से** (७.२.७७) इत्याभ्याम् एकमेव सूत्रं भवितुम् अर्हति स्म — **ईशीडजनां सेध्वयोः** | तथा किमर्थं न कृतं पाणिनिना? अस्य उत्तरे केवलमुच्यते, *विचित्रा हि सूत्रस्य कृतिः पाणिनेः* | अत्र से इत्यस्य अनुवृत्तिः, ध्वे इत्यस्य अपकषः (उपरि आनयनम्) | किमर्थं तथा कृतम्? आनन्दार्थम् इति वैयाकरणैः उच्यते |

<u>तकारान्तः षस्ति → सन्स्त् धातुः</u> (परस्मैपदी, स्वप्ने)

a) निरनुबन्धधातोः सिद्धिः—

सत्वम् | **धात्वादेः षः सः** (६.१.६४) = उपदेशावस्थायां धातोः आदौ षकारः अस्ति चेत्, षकारस्य स्थाने सकारादेशो भवति | धातोः आदिः, धात्वादिः षष्ठीतत्पुरुषः; तस्य धात्वादेः | धात्वादेः षष्ठ्यन्तं, षः षष्ठ्यन्तं, सः प्रथमान्तं, त्रिपदमिदं सूत्रम् | **आदेच उपदेशेऽशिति** (६.१.४५) इत्यस्मात् **उपदेशे** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्— **धात्वादेः षः सः उपदेशे** |

नुमागमः | **इदितो नुम् धातोः** (७.१.५८) = इदितः धातोः नुम् आगमो भवति | इदित् इत्युक्ते इत् इत् यस्य सः | तत्र प्रथमः इत् नाम ह्रस्वः इकारः | द्वितीयः इत् नाम इत्-संज्ञा | ह्रस्व-इकारस्य इत्-संज्ञा यस्य, सः धातुः इदित् | इत् इत् यस्य स इदित् बहुव्रीहिः, तस्य इदितः | इदितः षष्ठ्यन्तं, नुम् प्रथमान्तं, धातोः षष्ठ्यन्तं, त्रिपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णम्— **इदितः धातोः नुम्** |

**मिदचोऽन्त्यात्परः** (१.१.४७) = यः आगमः मित् अस्ति, सः अच्-वर्णेषु अन्त्यात् परः आयाति, अपि च अयं मित् यस्य वर्ण-समुदायस्य आगमः, तस्य अन्तिमावयवो भवति | म् इत् यस्य सः मित्, बहुव्रीहिः | मित् प्रथमान्तम्, अचः षष्ठ्यन्तम्, अन्त्यात् पञ्चम्यन्तम्, परः प्रथमान्तम्, अनेकपदमिदं सूत्रम् | **आद्यन्तौ टकितौ** (१.१.४६) इत्यस्मात् **अन्तः** इत्यस्य अनुवृत्तिः | अस्मिन् सूत्रे 'अचः' षष्ठीविभक्तौ;

"अन्त्यात् अचः" इत्यस्य अर्थः निर्धारणम्— नाम "सर्वेषु स्वरेषु अन्तिमः" | 'अचः' एकवचने चेदपि सार्वत्रिक–बहुवचनार्थकः | अत्र षष्ठीविभक्तेः अर्थः स्थाने इति न, अतः **षष्ठी स्थानेयोगा** (१.१.४९) इत्यस्य अपवादः | अनुवृत्ति–सहितसूत्रम्— **मित् अन्त्यात् अचः परः अन्तः** |

षस्ति → **उपदेशेऽजनुनासिक इत्** → षस्त् → **धात्वादेः षः सः** → सस्त् → **इदितो नुम् धातोः**, **मिदचोऽन्त्यात्परः** → सन्स्त् इति धातुः

b) अङ्गकार्यम्— उपधायां सकारः (लघु इक् इति न) अतः अङ्गकार्यं नास्ति |
c) सन्धिकार्यम्—

सन्स्त् + ति → **स्कोः संयोगाद्योरन्ते च** (८.२.२९) → सन्त् + ति → **नश्चापदान्तस्य झलि** (८.३.२४) → संत् + ति → **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) → सन्त् + ति → **झरो झरि सवर्णे** (८.४.६५) → सन्ति / सन्त्ति
सन्स्त् + अन्ति → **नश्चापदान्तस्य झलि** (८.३.२४) → संस्त् + अन्ति → संस्तन्ति
सन्स्त् + मि → **नश्चापदान्तस्य झलि** (८.३.२४) → संस्त् + मि → संस्त्मि [अत्र धेयम्—किमर्थं इमानि सूत्राणि न प्रवर्तनीयानि **स्कोः संयोगाद्योरन्ते च**, **अनुस्वारस्य ययि परसवर्णः**, **झरो झरि सवर्णे**]

लङि **हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** (६.१.६८) इत्यनेन हल्–उत्तरस्य अपृक्तसंज्ञक–प्रत्ययस्य लोपः | अनेन लङि त्–लोपः, स्–लोपश्च |
असन्स्त् + त् → असन्स्त् → **स्कोः संयोगाद्योरन्ते च** (८.२.२९) → असन्त् → **संयोगान्तस्य लोपः** (८.२.२३) → असन्

अत्र कश्चन प्रश्नः उदेति, 'असन्स्त्' इति स्थित्यां पदान्ते **संयोगान्तस्य लोपः** (८.२.२३), **स्कोः संयोगाद्योरन्ते च** (८.२.२९), इति द्वयोः अपि प्रसक्तिः | सूत्रद्वयं त्रिपाद्याम्, अतः किमर्थं न **पूर्वत्रासिद्धम्** (८.२.१) इत्यनेन परशास्त्रम् असिद्धम्, असिद्धत्वात् **संयोगान्तस्य लोपः** (८.२.२३) अत्र भवेत् ? उत्तरम् अस्ति यत् पदान्ते, **स्कोः संयोगाद्योरन्ते च** (८.२.२९) इति सूत्रं, **संयोगान्तस्य लोपः** (८.२.२३) इत्यस्य अपवादः; यत्र पदान्तसंयोगे प्रथमसदस्यः सकारः ककारः च, तत्रापि **संयोगान्तस्य लोपः** (८.२.२३) भवति चेत्, पदान्ते **स्कोः संयोगाद्योरन्ते च** (८.२.२९) निरवकाशं भवति | अतः अपवादत्वात् पदान्ते अवसरे सति **स्कोः संयोगाद्योरन्ते च** (८.२.२९) इत्येव प्रवर्तनीयं भवति | **पूर्वत्रासिद्धम्** (८.२.१) इत्यस्यापि अपवादः |

अन्यः प्रश्नः उदेति किमर्थं न पूर्वमेव **नश्चापदान्तस्य झलि** (८.३.२४) इत्यनेन अनुस्वारः, आरम्भे एव असंस्त्, तदा **स्कोः संयोगाद्योरन्ते च** (८.२.२९) इत्यनेन असंत्, तदा **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) इत्यनेन नकारः, असन्त्, तदा **पूर्वत्रासिद्धम्** (८.२.१) इत्यनेन **संयोगान्तस्य लोपः** (८.२.२३) इत्यस्य दृष्ट्या नकारः असिद्धः अतः असन्त् इत्येव स्यात् ? उत्तरम अस्ति यत् अस्मिन् क्रमे **नश्चापदान्तस्य झलि** (८.३.२४) इत्यस्य अवसरः न भवति एव परसूत्रात् | **स्कोः संयोगाद्योरन्ते च** (८.२.२९), **संयोगान्तस्य लोपः** (८.२.२३), सूत्रद्वयमपि अष्टमाध्यायस्य द्वितीयपादे अतः पूर्वं भवन्ति, असन् इति रूपं सिध्यति | असन् इति दशायां नकारात् परे झल् तु नास्ति एव अतः अस्यां प्रक्रियायां **नश्चापदान्तस्य झलि** (८.३.२४) न कुत्रापि भवति | आरम्भात् अन्तपर्यन्तं नुम्–आगमस्य नकारः 'न्' इत्येव तिष्ठति |

**हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** (६.१.६७) = हलन्तात्, दीर्घङ्यन्तात्, दीर्घाबन्तात् च सु–ति–सि इत्येषाम् अपृक्तसंज्ञकस्य हलः लोपः | अनेन प्रथमाविभक्तौ सु इत्यस्य स्–लोपः, लङि प्रथमपुरुषे त्–लोपः, मध्यमपुरुषे स्–लोपश्च | हल् च ङी च आप् च तेषाम् इतरेतरद्वन्द्वः हल्ङ्यापः, तेभ्यः हल्ङ्याब्भ्यः | सुश्च, तिश्च, सिश्च तेषां समाहारद्वन्द्वः, सुतिसि, सुतिसिनः अपृक्तं सुतिस्यपृक्तम् | हल्ङ्याब्भ्यः पञ्चम्यन्तं, दीर्घात् पञ्चम्यन्तं, सुतिस्यपृक्तं प्रथमान्तं, हल् प्रथमान्तम्, अनेकपदमिदं सूत्रम् | **लोपो व्योर्वलि** (६.१.६५) इत्यस्मात् **लोपः** इत्यस्य अनुवृत्तिः; अत्र कर्मणि प्रयोगे **लुप्यते** इति रूपविकारः | अनुवृत्ति–सहितसूत्रम्— **दीर्घात् हल्ङ्याब्भ्यो सुतिसि अपृक्तं हल् लुप्यते** |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

दकारान्तः अद् धातुः (परस्मैपदी, भक्षणे)

a) अङ्गकार्यम्— उपधायां ह्रस्व–अकारः (लघु इक् इति न) अतः अङ्गकार्यं नास्ति |
b) सन्धिकार्यम्— दकारान्तः धातुः अतः बहुत्र **खरि च** इत्यस्य प्रसक्तिः |

अद्–धातुः अजादिः अतः लङि **आडजादीनाम्** इत्यनेन आडागमः, **आटश्च** इत्यनेन वृद्धिरादेशः च | आ + अद् → आद् इति अङ्गम् | अन्यच्च अपृक्तप्रत्ययः परे अस्ति चेत् तस्य अपृक्तप्रत्ययस्य अडागमो भवति इति कारणतः अत्र अपृक्तप्रत्ययस्य लोपो न भवति अद्–धातुतः | (सामान्यतया हलन्तधातुतः अपृक्तप्रत्ययस्य लोपो भवति इति तु जानीमः | **हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्**)

आद् + त् → **अदः सर्वेषाम्** → आद् + अट् + त् → अनुबन्धलोपे → आद् + अ + त् → आदत्
आद् + स् → **अदः सर्वेषाम्** → आद् + अट् + स् → अनुबन्धलोपे → आद् + अ + स् → आदः

**अदः सर्वेषाम्** (७.३.१००) = अद्–धातोः उत्तरस्य सार्वधातुक–अपृक्तसंज्ञक–प्रत्ययस्य अडागमो भवति—इति सर्वेषां वैयाकरणानां मतम् | अदः पञ्चम्यन्तं, सर्वेषाम् षष्ठ्यन्तं, द्विपदमिदं सूत्रम् | **अस्तिसिचोऽपृक्ते** (७.३.९६) इत्यस्मात् **अपृक्ते** इत्यस्य षष्ठ्यन्तानुवृत्तिः, **तुरुस्तुशम्यमः सार्वधातुके** (७.३.९५) इत्यस्मात् **सार्वधातुके** इत्यस्य षष्ठ्यन्तानुवृत्तिः, **उतो वृद्धिर्लुकि हलि** (७.३.८९) इत्यस्मात **हलि** इत्यस्य षष्ठ्यन्तानुवृत्तिः, **अड् गार्ग्यगालवयोः** (७.३.९९) इत्यस्मात् **अट्** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **सर्वेषां (मते) अदः अङ्गस्य सार्वधातुकस्य अपृक्तस्य हलः अट्** |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

रूपाणि
लटि —
लोटि—
लङि—
विधिलिङि—

दकारान्त विद → विद् धातुः (परस्मैपदी, ज्ञाने)

a) अङ्गकार्यम्—

१) हलादि पित्सु = उपधायां लघु–इकः गुणः | विद् + ति → **पुगन्तलघूपधस्य च** → वेद् + ति → वेत्ति
२) अजादि पित्सु = उपधायां लघु–इकः गुणः | विद् + आनि → **पुगन्तलघूपधस्य च** → वेद् + आनि → वेदानि
३) हलाद्यपित्सु = **क्ङिति च**, गुणनिषेधः | विद् + तः → वित्तः
४) अजाद्यपित्सु = **क्ङिति च**, गुणनिषेधः | विद् + अन्ति → विदन्ति

b) सन्धिकार्यं— **खरि च** इत्यनेन चर्त्वं बहुत्र प्रवर्तते |

**विदो लटो वा** (३.४.८३) = विद्–धातोः लटि, विकल्पेन लिट्–लकारस्य नव प्रत्ययाः प्रयुज्यन्ते— णल् (अ), अतुः, उः, थल्, अथुः, अ, णल् (अ), व, म | विदः पञ्चम्यन्तं, लटः षष्ठ्यन्तं, वा अव्ययं, त्रिपदमिदं सूत्रम् | **परस्मैपदानां णलतुसुस्–थलथुस–णल्वमाः** (३.४.८२) इत्यस्य पूर्णतया अनुवृतिः | **धातोः** (३.१.९१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **विदः धातोः लटः परस्मैपदानां वा णलतुसुस्–थलथुस–णल्वमाः** |

लोट्–लकारस्य अपि वैकल्पिक–रूपाणि भवन्ति | **विदाङ्कुर्वन्त्वित्यन्यतरस्याम्** (३.१.४१) इति सूत्रेण निपातनेन विदाङ्कुर्वन्तु इत्यादीनि रूपाणि दीयन्ते | निपातनेन इत्युक्तौ सिद्धरूपं दीयते, तत्र प्रक्रिया मास्तु | निपातनस्य कारणम् इदं यत् रूपस्य प्रक्रिया–विधानार्थम् अधिकनूतनसूत्राणि अपेक्षितानि स्युः इति कृत्वा पाणिनेः मतानुसारं मास्तु | रूपमेवमेव भवतु |

**विदाङ्कुर्वन्त्वित्यन्यतरस्याम्** (३.१.४१) = लोटि परे विद्–धातुतः आम्–प्रत्ययः, लघूपधगुणाभावः, लोटः लुक्, लोडन्त–कृ–धातोः

अनुप्रयोगः च इतीमानि चत्वारि कार्याणि मिलित्वा विकल्पेन भवन्ति | विद् + आम् → विदाम्, अत्र लघूपधगुणः न, लोटः लुक्, अपि च कृ-धातोः लोडन्तरूपाणि → विदाम् + करोतु → विदाङ्करोतु | विदाङ्कुर्वन्तु तिङन्तपदम्, 'इति' अव्ययपदम्, अन्यतरस्याम् सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णम्— **विदाङ्कुर्वन्तु इति अन्यतरस्याम्** |

लङि—

**सिजभ्यस्तविदिभ्यश्च** (३.४.१०९) = ङित्-लकारस्य अवस्थायां, सिच्-प्रत्ययात्, अभ्यस्तसंज्ञकात् धातोः, विद्-धातोः च, परस्य झि-प्रत्ययस्य स्थाने जुस्-आदेशो भवति | सिच् च अभ्यस्तश्च विदिश्च तेषामितरेतरद्वन्द्वः सिजभ्यस्तविदयः, तेभ्यः सिजभ्यस्तविदिभ्यः | सिजभ्यस्तविदिभ्यः पञ्चम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **नित्यं ङितः** (३.४.९९) इत्यस्मात् **ङितः** इत्यस्य अनुवृत्तिः | **झेर्जुस्** (३.४.१०८) इत्यस्मात् **झेः जुस्** इत्यनयोः अनुवृत्तिः | **लस्य** (३.४.७७) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **सिजभ्यस्तविदिभ्यः च ङितः लस्य झेः जुस्** |

अविद् + झि → अविद् + उः → अविदुः

**दश्च** (८.२.७५) = धातोः पदान्ते दकारस्य स्थाने विकल्पेन रु-आदेशो भवति सिपि परे | रु-अभावे दत्वम् एव | **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अन्तिमवर्णस्य (दकारस्य) एव स्थाने न तु पूर्णपदस्य | दः पञ्चम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **सिपि धातो रुर्वा** (८.२.७४) इत्यस्य पूर्णसूत्रस्य अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **दः च पदस्य धातोः रुः वा सिपि** |

अविद् + स् → अवेद् + स् → **हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** इत्यनेन हल्-परतः अपृक्तसंज्ञक-प्रत्ययस्य लोपः → अवेद्
अवेद् → **वाऽवसाने** इत्यनेन विकल्पेन पदान्ते चर्-आदेशः → अवेत्
अविद् + स् → अवेद् + स् → **दश्च** → अवेरु → **खरवसानयोर्विसर्जनीयः** इत्यनेन विसर्गादेशः → अवेः

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप-चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

<u>नकारान्तः हन → हन् धातुः</u> (परस्मैपदी, हिंसागत्योः)

a) अङ्गकार्यम्—

१) हलादि पित्सु = उपधायां ह्रस्व-अकारः न तु लघु इक्, अतः कार्यं नास्ति |
२) अजादि पित्सु = उपधायां ह्रस्व-अकारः न तु लघु इक्, अतः कार्यं नास्ति |
३) हलाद्यपित्सु = हन्-धातोः नकारलोपः भवति **अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति** इति सूत्रेण | हन् + तः → हतः
४) अजाद्यपित्सु = उपधायां स्थितस्य स्वरलोपो भवति **गमहनजनखनघसां लोपः क्ङित्यनङि** इति सूत्रेण | हन् + अन्ति → ह्न् + अन्ति

हलाद्यपितः तस् इत्यादयः अपित्-सार्वधातुकाः, अतः **सार्वधातुकम् अपित्** इत्यनेन ङिद्वत् | झलादि-कित्ङित्-प्रत्यये परे, हन्-धातोः नकारलोपो भवति |

**अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति** (६.४.३७) = वन्-धातोः, अनुनासिकान्त-अनुदात्तोपदेश-धातोः, अनुनासिकान्त-तनादि-धातोः अनुनासिकस्य लोपो भवति झलादि-कित्ङित्-प्रत्यये परे | अनुदात्तः उपदेशे येषां ते, अनुदात्तोपदेशाः बहुव्रीहिः | तनोतिः आदिः येषां ते, तनोत्यादयः बहुव्रीहिः | अनुदात्तोपदेशाश्च वनतिश्च तनोत्यादयश्च तेषामितरेतरद्वन्द्वः अनुदात्तोपदेशवनतितनोत्यादयः, तेषाम् अनुदात्तोपदेशवनतितनोत्यादीनाम् | क् च ङ् तयोरितरेतरद्वन्द्वः क्ङौ, तौ इतौ यस्य तत् क्ङित्,

तस्मिन् क्ङिति। अनुदात्तोपदेशवनतितनोत्यादीनां षष्ठ्यन्तम्, अनुनासिक इति लुप्तषष्ठीकं पदं, लोपः प्रथमान्तं, झलि सप्तम्यन्तं, क्ङिति सप्तम्यन्तम्, अनेकपदमिदं सूत्रम्। **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः। **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन तादृशम् अङ्गं यस्य अन्ते अनुनासिकवर्णः अस्ति (वनतिं विहाय 'अनुनासिक' इति पदं सर्वेषां विशेषणम्); **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अन्ते स्थितस्य अनुनासिकवर्णस्य लोपः; **यस्मिन् विधिस्तदादावल्ग्रहणे** (१.१.७२, वार्तिकम् २९) इत्यनेन **झलि क्ङिति** इत्युक्तौ झलादौ क्ङिति (तादृशप्रत्ययः यस्य आदौ झल् स्यात्)। अनुवृत्ति-सहितसूत्रम्— **अनुनासिक-अनुदात्तोपदेशवनतितनोत्यादीनाम् अङ्गस्य लोपः झलि क्ङिति।**

अनेन आहत्य पञ्चदश धातवः निर्दिष्टाः। वन् धातुः (भ्वादिगणे), अनुनासिकान्त-अनुदात्तोपदेश-धातवः (यम्, रम्, नम्, गम्, हन्, मन्), अनुनासिकान्त-तनादि-धातवः (तनु, क्षिणु, क्षणु, ऋणु, तृणु, घृणु, वनु, मनु)। एषु धातुषु मन्-धातुः दिवादिगणे अस्ति; हन्-धातुः अदादिगणे अस्ति; अष्ट धातवः तनादिगणे सन्ति; अवशिष्टाः भ्वादौ एव। एषां धातूनां अन्ते स्थितस्य अनुनासिकस्य लोपो भवति झलादि-कित्ङित्-प्रत्यये परे। यथा—

हन् + तः → हतः　　　　हन् + थः → हथः [अदादिगणे विकरणं नास्ति]
गम् + तः → गतः　　　　जङ्गम् + थः → जङ्गथः [यङ्लुकि विकरणं नास्ति]
मन् + तः → मतः　　　　तन् + तः → ततः [क्त-प्रत्यये परे]
रम् + तः → रतः　　　　यम् + तः → यतः [क्त-प्रत्यये परे]

अजाद्यपित्सु अन्ति इत्यादीषु प्रत्ययेषु हन्-धातोः उपधायां स्थितस्य अकारस्य लोपो भवति हन् → ह्न्। तदा हकारात् परे नकारः अस्ति अतः ह्-स्थाने घकारादेशो भवति ह्न् → घ्न्।

**गमहनजनखनघसां लोपः क्ङित्यनङि** (६.४.९८) = गम्, हन्, जन्, खन्, घस् एषां धातूनाम् उपधायाः लोपो भवति अजादि-कित्ङित्-प्रत्यये परे (परन्तु अङ्-प्रत्ययः चेत् लोपः न भवति)। गमश्च हनश्च जनश्च खनश्च घस् च तेषामितरेतरद्वन्द्वो गमहनजनखनघसः, तेषां गमहनजनखनघसाम्। क् च ङ् च क्ङौ, क्ङौ इतौ यस्य सः क्ङित्, तस्मिन् क्ङिति। न अङ् अनङ्, तस्मिन् अनङि। गमहनजनखनघसां षष्ठ्यन्तं, लोपः प्रथमान्तं, क्ङिति सप्तम्यन्तम्, अनङि सप्तम्यन्तम् अनेकपदमिदं सूत्रम्। **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यस्मात् **अचि** इत्यस्य अनुवृत्तिः; **ऊदुपधाया गोहः** (६.४.८९) इत्यस्मात् **उपधायाः** इत्यस्य अनुवृत्तिः। **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः। अनुवृत्ति-सहितसूत्रम्— **गमहनजनखनघसाम् अङ्गानाम् उपधायाः लोपः अचि क्ङिति अनङि।**

**हो हन्तेर्ञ्णिन्नेषु** (७.३.५४) = हन्-धातोः हकारस्य स्थाने कवर्गादेशो भवति ञिति णिति प्रत्यये परे, नकारे परे च। **स्थानेऽन्तरतमः** (१.१.५०) इत्यनेन कवर्गे घकारः आदिष्टो भवति। ञ् च ण् च ञ्णौ इतरेतरद्वन्द्वः, तौ इतौ ययोस्तौ ञ्णितौ, बहुव्रीहिः। ञ्णितौ च नश्च तेषामितरेतरद्वन्द्वो ञ्णिन्नाः, तेषु ञ्णिन्नेषु। **इक्श्तिपौ धातुनिर्देशे इति वक्तव्यम्** इति वार्तिकेन (३.३.१०८, वार्तिकम्), धातुनिर्देशे हन् धातोः हन्ति, षष्ठीविभक्तौ हन्तेः। हः षष्ठ्यन्तं, हन्तेः षष्ठ्यन्तं, ञ्णिन्नेषु सप्तम्यन्तं, त्रिपदमिदं सूत्रम्। **चजोः कु घिण्ण्यतोः** (७.३.५२) इत्यस्मात् **कुः** इत्यस्य अनुवृत्तिः। **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः। अनुवृत्ति-सहितसूत्रम्— **हन्तेः अङ्गस्य हः कु ञ्णिन्नेषु।**

हन् + अन्ति → **गमहनजनखनघसां लोपः क्ङित्यनङि** → ह्न् + अन्ति → **हो हन्तेर्ञ्णिन्नेषु** → घ्न् + अन्ति → वर्णमेलने → घ्नन्ति

लोटि—

**हन्तेर्जः** (६.४.३६) = हि-प्रत्यये परे हन्-धातोः स्थाने ज-आदेशो भवति। हन्तेः षष्ठ्यन्तं, जः प्रथमान्तं, द्विपदमिदं सूत्रम्। ज-आदेशः अनेकाल् अतः **अनेकाल्शित् सर्वस्य** (१.१.५५) इत्यनेन सर्वस्य स्थाने भवति न तु अन्त्यस्य। **शा हौ** (६.४.३५) इत्यस्मात् **हौ** इत्यस्य अनुवृत्तिः। **अङ्गस्य** (६.४.१) इत्यस्य अधिकाराः। अनुवृत्ति-सहितसूत्रम्— **हन्तेः अङ्गस्य जः हौ।**

**अनेकाल्शित् सर्वस्य** (१.१.५५) = आदेशः अनेकाल् शित् च चेत्, सर्वस्य स्थाने आदेशः भवति न तु अन्त्यस्य। **अलोऽन्त्यस्य** (१.१.५२) इत्यस्य अपवादः। न एकः अनेकः नञ्तत्पुरुषः। अनेकः अल् यस्य सः अनेकाल्, बहुव्रीहिः। श इत् यस्य सः शित्, बहुव्रीहिः। अनेकाल् च शित् च अनेकाल्शित्, बहुव्रीहि-गर्भ-समाहारद्वन्द्वः। अल् इति प्रत्याहारे सर्वे वर्णाः अन्तर्भूताः; अनेकाल् इत्युक्तौ तादृशः आदेशः यस्मिन् एक एव वर्णः न अपि तु अनेके वर्णाः। अनेकाल् प्रथमान्तं, शित् प्रथमान्तं, सर्वस्य षष्ठ्यन्तं, त्रिपदमिदं सूत्रम्। **स्थानेऽन्तरतमः** (१.१.५०) इत्यस्मात् **स्थाने** इत्यस्य अनुवृत्तिः। अनुवृत्ति-सहितसूत्रम्— **अनेकाल्शित् सर्वस्य स्थाने।**

हन् + हि → ज + हि

अधुना अङ्गम् अदन्तं जातम् अतः **अतो हेः** (६.४.१०५) इत्यनेन हि इत्यस्य लुक् विधीयते।

**अतो हेः** (६.४.१०५) = ह्रस्व-अकारात् अङ्गात् परस्य हि इत्यस्य लुक् (लोपः) भवति। अतः पञ्चम्यन्तं, हेः षष्ठ्यन्तं, द्विपदमिदं सूत्रम्। **चिणो लुक्** (६.४.१०४) इत्यस्मात् **लुक्** इत्यस्य अनुवृत्तिः। **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः (अत्र **अङ्गात्** भवति विभक्तिपरिणाम इति सिद्धान्तेन)। अनुवृत्ति-सहितसूत्रम्— **अतः अङ्गात् हेः लुक्**।

**असिद्धवदत्राभात्** (६.४.२२) = कमपि आश्रयम् अधिकृत्य आभीय-कार्यं, द्वितीयं समानाश्रितम् आभीय-कार्यं प्रति असिद्धं भवति। अधिकारसूत्रम्। **भस्य** (६.४.१२९) इति अधिकारसूत्रेण भ-संज्ञा सम्बद्धकार्याणि भवन्ति षष्ठाध्ययस्य अन्तपर्यन्तम्। **असिद्धवदत्राभात्** (६.४.२२) इत्यनेन ६.४.२३ इत्यस्मात् आरभ्य, **भस्य** इत्यस्य अधिकारस्य अन्तपर्यन्तम्, एषां कार्याणां नाम आभीय-कार्यम्। सूत्रं स्वयं सम्पूर्णम्— **असिद्धवत् अत्र आ भात्**।

**हन्तेर्जः** (६.४.३६), **अतो हेः** (६.४.१०५) इत्याभ्यां यत् कार्यं सिध्यति, उभयत्र तत् कार्यं आभीयकार्यम्। द्वाभ्यां च सूत्राभ्यां यत् कार्यं विधीयते, तस्य कार्यस्य आश्रयः 'हि'-प्रत्ययः। अतः एकवारं यदा एकं हि-प्रत्ययाश्रितम् आभीयकार्यं जातं, तदा यदा द्वितीयं हि-प्रत्ययाश्रितम् आभीयकार्यं विधीयते, तत् कार्यं प्रति प्रथमम् आभीयकार्यं असिद्धं भवति।

**असिद्धवदत्राभात्** (६.४.२२) इत्यनेन **अतो हेः** (६.४.१०५) इति सूत्रस्य दृष्ट्या **हन्तेर्जः** (६.४.३६) इति सूत्रेण यत् कार्यं जातं, तत् कार्यम् असिद्धम् अस्ति अतः **अतो हेः** (६.४.१०५) इत्यस्य दृष्ट्या हन्-धातोः स्थाने ज-आदेशः न जातः। तस्मात् अङ्गम् अदन्तं नास्ति, अतः **अतो हेः** (६.४.१०५) इत्यनेन हि इत्यस्य लुक् न भवति।

हन् + हि → ज + हि → जहि

b) सन्धिकार्यम्—

हन् + ति → **नश्चापदान्तस्य झलि** → हं + ति → **अनुस्वारस्य ययि परसवर्णः** → हन् + ति → हन्ति
हन् + सि → **नश्चापदान्तस्य झलि** → हं + सि → वर्णमेलने → हंसि

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि। उपरि दत्तानां नियमानाम् आधारेण रूप-चिन्तनं करोतु।

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

<u>रेफान्तः ईर → ईर्-धातुः</u> (आत्मनेपदी, गतौ कम्पने च)

a) अङ्गकार्यम्— उपधायां दीर्घ-ईकारः (लघु इक् इति न) अतः अङ्गकार्यं नास्ति।
b) सन्धिकार्यम्— अत्यन्तं न्यूनं यतः रेफात् परे त्, थ्, ध् एते हलः सन्ति चेत् केवलं संयोजनम्। आं रेफः इण्-प्रत्याहारे अस्ति अतः रेफात् परे सकारः चेत् **आदेशप्रत्यययोः** इत्यनेन सकारस्य षत्वम्। ईर् + से → ईर् + षे → ईर्षे

ईर् -धातुः अजादिः अतः लङि **आडजादीनाम्** इत्यनेन आडागमः, **आटश्च** इत्यनेन वृद्धिरादेशः च। आ + ईर् → ऐर् इति अङ्गम्।

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि। उपरि दत्तानां नियमानाम् आधारेण रूप-चिन्तनं करोतु।

<u>रूपाणि</u>
लटि —
लोटि—
लङि—

विधिलिङि—

<u>शकारान्तः वश → वश् धातुः</u> (परस्मैपदी, कान्तौ)

a) अङ्गकार्यम्—

१) हलादि पित्सु = उपधायां ह्रस्व–अकारः अतः किमपि गुणकार्यं नास्ति |
२) अजादि पित्सु = उपधायां ह्रस्व–अकारः अतः किमपि गुणकार्यं नास्ति |
३) हलाद्यपित्सु = ङित्सु प्रत्ययेषु सम्प्रसारणं भवति | वश् + तः → उश् + तः
४) अजाद्यपित्सु = ङित्सु प्रत्ययेषु सम्प्रसारणं भवति | वश् + अन्ति → उश् + अन्ति

**ग्रहि ज्या वयि व्यधि वष्टि विचति वृश्चति पृच्छति भृज्जतीनां ङिति च** (६.१.१६) = ग्रह्, ज्या, वय्, व्यध्, वश्, व्यच्, व्रश्च्, प्रच्छ्, भ्रस्ज्, एषां सम्प्रसारणं भवति किति ङिति प्रत्यये परे | इतरेतरद्वन्द्वः, षष्ठीविभक्तौ | ग्रहि–ज्या–वयि–व्यधि–वष्टि–विचति–वृश्चति–पृच्छति–भृज्जतीनां षष्ठ्यन्तम्, ङिति सप्तम्यन्तम्, च अव्ययम्, त्रिपदमिदं सूत्रम् | **वचिस्वपियजादीनां किति** (६.१.१५) इत्यस्मात् **किति** इत्यस्य अनुवृत्तिः; **ष्यङः सम्प्रसारणम् पुत्रपत्योस्तत्पुरुषे** (६.१.१३) इत्यस्मात् **सम्प्रसारणम्** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहित–सूत्रम्— **ग्रहि ज्या वयि व्यधि वष्टि विचति वृश्चति पृच्छति भृज्जतीनां ङिति किति च सम्प्रसारणम्** |

सम्प्रसारणम् इत्यस्मिन् विषये स्मर्यताम्— यण्सन्धेः विपरीतत्वेन भवति रूपाणि, सम्प्रसारणे |

| यण् सन्धौ इकः यण्— | सम्प्रसारणे यणः इक्— |
|---|---|
| इ → य् | य् → इ |
| उ → व् | व् → उ |
| ऋ → र् | ‸ → ऋ |
| ऌ → ल् | ल् → ऌ |

इक् प्रत्याहारे इ उ ऋ ऌ इति वर्णाः अन्तर्भूताः | यण् प्रत्याहारे य् व् ‸ ल् इति वर्णाः अन्तर्भूताः | यत्र सम्प्रसारणस्य आदेशः भवति, तत्र य् स्थाने इ, व् स्थाने उ, ‸ स्थाने ऋ, ल् स्थाने ऌ |

**इग्यणः सम्प्रसारणम्** (१.१.४५) = यणः स्थाने यः इक्–प्रत्याहारे स्थितवर्णः आदिष्टः, तस्य सम्प्रसारण–संज्ञा भवति | इक् प्रथमान्तं, यणः षष्ठ्यन्तं, सम्प्रसारणम् प्रथमान्तं, त्रिपदमिदं सूत्रम् | सूत्रं सम्पूर्णम्— **यणः इक् सम्प्रसारणम्** |

**सम्प्रसारणाच्च** (६.१.१०८) = सम्प्रसारण–संज्ञक–वर्णात् परे अच् अस्ति चेत्, पूर्वपरयोः स्थाने एकः पूर्वरूपादेशो भवति | सम्प्रसारणात् पञ्चम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **इको यणचि** (६.१.७७) इत्यस्मात् **अचि**, **अमि पूर्वः** (६.१.१०७) इत्यस्मात् **पूर्वः** इत्यनयोः अनुवृत्तिः भवतः | **एकः पूर्वपरयोः** (६.१.८४), **संहितायाम्** (६.१.७१) इत्यनयोः अधिकारः | अनुवृत्ति–सहित–सूत्रम्— **सम्प्रसारणात् च अचि पूर्वपरयोः एकः पूर्वः संहितायाम्** |

वश्–धातुः सम्प्रसारणी अतः किति ङिति प्रत्यये परे वश् → उश् भवति | अपितः प्रत्ययाः ङित्वत् भवन्ति **सार्वधातुकम् अपित्** इत्यनेन, अतः तेषु अपित्सु परेषु सम्प्रसारणं विहितम् अस्ति |

लङि—
वश्–धातुः हलादिः परन्तु ङित्सु प्रत्ययेषु अजादिः भवति सम्प्रसारणत्वात् (वश् → उश्) | ङित्सु प्रत्ययेषु धातोः अजादित्वात् **आडजादीनाम्** इत्यनेन आडागमः, **आटश्च** इत्यनेन वृद्धिरादेशः च |

वश् + ताम् → अपित्सु सम्प्रसारणे → उश् + ताम् → **आडजादीनाम्** → आ + उश् + ताम् → **आटश्च** इत्यनेन वृद्धिरादेशः → औश् + ताम् → सन्धिकार्यम् → औष्टाम्

पित्सु सम्प्रसारणाभावे अडागम एव | अवश् + त् → अवट्

b) सन्धिकार्यम्—

वश् + ति → **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इत्यनेन षत्वम् → वष् + ति → **ष्टुना ष्टुः** (८.४.४१) इत्यनेन ष्टुत्वम् → वष्टि
वश् + थः → **ग्रहिज्या०** (६.१.१६) इत्यनेन सम्प्रसारणम् → उश्+ थः → **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इत्यनेन षत्वम् → उष् + थः → **ष्टुना ष्टुः** (८.४.४१) इत्यनेन ष्टुत्वम् → उष्ठः
वश् + सि → **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इत्यनेन षत्वम् → वष् + सि → **षढोः कः सि** (८.२.४१) इत्यनेन ककारादेशः → वक् + सि → **आदेशप्रत्यययोः** (८.३.५९) → वक्षि
वश् + हि → **हुझल्भ्यो हेर्धिः** (६.४.१०१) → वश् + धि → **ग्रहिज्या०** (६.१.१६) इत्यनेन सम्प्रसारणम् → उश् + धि → **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इत्यनेन षत्वम् → उष् + धि → **ष्टुना ष्टुः** (८.४.४१) → उष् + ढि → **झलां जश् झशि** (८.४.५३) → उड् + ढि → वर्णमेलने → उड्ढि
वश् + त् → अवश् + त् → **हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** (६.१.६७) → अवश् → **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इत्यनेन पदान्ते शकारस्य षत्वम् → अवष् → **झलां जशोऽन्ते** (८.२.३९) → अवड् → **वाऽवसाने** (८.४.५६) → अवट् (विकल्पेन)

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप-चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

<u>शकारान्तः ईश → ईश् धातुः</u> (आत्मनेपदी, ऐश्वर्ये)

a) अङ्गकार्यम्— उपधायां दीर्घ-ईकारः (लघु इक् इति न) अतः अङ्गकार्यं नास्ति |

b) इडागमः—

**ईशः से** (७.२.७७) = ईश्-धातुतः परस्य सार्वधातुकसंज्ञकस्य 'से' च 'ध्वे'-शब्दस्य च इडागमो भवति |

**ईडजनोर्ध्वे च** (७.२.७८) = ईड्, जन् इत्याभ्यां धातुभ्यां परस्य सार्वधातुकसंज्ञकस्य 'से' च 'ध्वे'-शब्दस्य च इडागमो भवति | इडश्च जन् च इडजनौ, तयोः इडजनोः | इडजनोः पञ्चम्यर्थे षष्ठी | ध्वे लुप्तषष्ठीकं पदं, च अव्ययम् | **इडत्यर्त्तिव्ययतीनाम्** (७.२.६६) इत्यस्मात् **इट्** इत्यस्य अनुवृत्तिः | **रुदादिभ्यः सार्वधातुके** (७.२.७६) इत्यस्मात् **सार्वधातुके** इत्यस्य अनुवृत्तिः | 'च' इति अव्ययेन पूर्वतनस्य **ईशः से** (७.२.७७) इत्यस्य पूर्णतया अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **ईशः ईडजनोः अङ्गात् सार्वधातुकस्य से ध्वे च इट्** |

केचन वैयाकरणाः वदन्ति यत् उपरितनयोः सूत्रयोः फलितोऽर्थः अयं यत् द्वितीयसूत्रस्य "च" इत्यनेन ईश्-धातोः अपि अनुवृत्तिः भवति **ईडजनोर्ध्वे च** (७.२.७८) इति सूत्रे | अनेन ईश्-धातुतः 'ध्वे'-शब्दस्य अपि इडागमो भवति | अन्ये वैयाकरणाः वदन्ति यत् से इत्यस्य अनुवृत्तिः भवति **ईडजनोर्ध्वे च** (७.२.७८) इति सूत्रे, 'ध्वे'-शब्दस्य च अपकषः (उपरि आनयनम्) भवति **ईशः से** (७.२.७७) इति सूत्रे | यथा कथमपि भवतु, द्वयोः सूत्रयोः, से च ध्वे च द्वयोः अन्तर्भावः | अनेन मध्यमपुरुषे लटि लोटि च यथा ईड्, जन् इति धातुभ्यां, तथैव ईश्-धातोः अपि इडागमः भवति |

c) सन्धिकार्यम्—

- झलि परे शकारस्य षत्वं **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** इति सूत्रेण |
- षत्वे सति तादि थादि धादि च प्रत्ययानां ष्टुत्वं **ष्टुना ष्टुः** इति सूत्रेण |
- झशि जश्त्वं **झलां जश् झशि** इति सूत्रेण |

ईश् + ते → **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** → ईष् + ते → **ष्टुना ष्टुः** → ईष् + टे → ईष्टे

लङि—
ईश्–धातुः अजादिः अतः लङि **आडजादीनाम्** इत्यनेन आडागमः, **आटश्च** इत्यनेन वृद्धिरादेशः च | आ + ईश् → ऐश् इति अङ्गम् |

ऐश् + ध्वम् → **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** → ऐष् + ध्वम् → **ष्टुना ष्टुः** → ऐष् + ढ्वम् → **झलां जश् झशि** → ऐड् + ढ्वम् → ऐड्ढ्वम्

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

रूपाणि
लटि —
लोटि—
लङि—
विधिलिङि—

षकारान्तः द्विष → द्विष् धातुः (प्रसमैपदी, अप्रीतौ)

a) अङ्गकार्यम्—
१) हलादि पित्सु = उपधायां लघु–इकः गुणः | द्विष् + ति → **पुगन्तलघूपधस्य च** → द्वेष् + ति → सन्धिकार्यम् → द्वेष्टि
२) अजादि पित्सु = उपधायां लघु–इकः गुणः | द्विष् + आनि → **पुगन्तलघूपधस्य च** → द्वेष् + आनि → **रषाभ्यां नो णः समानपदे** इत्यनेन णत्वम् → द्वेषाणि
३) हलाद्यपित्सु = **क्ङिति च**, गुणनिषेधः | द्विष् + तः → सन्धिकार्यमेव → द्विष्टः
४) अजाद्यपित्सु = **क्ङिति च**, गुणनिषेधः | द्विष् + अन्ति → वर्णमेलनमेव → द्विषन्ति

b) सन्धिकार्यम्—

- षकारान्तधातोः षकारात् तादि थादि प्रत्ययानां ष्टुत्वं **ष्टुना ष्टुः** इति सूत्रेण |
- सकारे परे षकारस्य ककारादेशः **षढोः कः सि** इति सूत्रेण |
- झशि जश्त्वं **झलां जश् झशि** इति सूत्रेण |

द्विष् + ति → गुणादेशः → द्वेष् + ति → **ष्टुना ष्टुः** → द्वेष् + टि → द्वेष्टि
द्विष् + सि → गुणादेशः → द्वेष् + सि → **षढोः कः सि** → द्वेक् + सि → **आदेशप्रत्यययोः** → द्वेक् + षि → वर्णमेलने → द्वेक्षि
द्विष् + हि → **हुझल्भ्यो हेर्धिः** → द्विष् + धि → **ष्टुना ष्टुः** → द्विष् + ढि → **झलां जश् झशि** → द्विड् + ढि → द्विड्ढि

लङि—
**द्विषश्च** (३.४.११२) = द्विष्–धातुतः लङादेशस्य झि–स्थाने जुस्–आदेशः शाकटायनस्य मते | द्विषः पञ्चम्यन्तं, च अव्ययं, द्विपदमिदं सूत्रम् | **झेर्जुस्** (३.४.१०८), **लङः शाकटायनस्यैव** (३.४.१११) इत्यनयोः पूर्णतया अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **द्विषः च लङः झेः जुस् शाकटायनस्य एव** |

अद्विष् + जुस् → अद्विषुः इति रूपम् | अन्येषां मते 'अन्' इत्येव भवति— अद्विष् + अन् → अद्विषन् |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

रूपाणि
लटि —
लोटि—

लङि—
विधिलिङि—

<u>णत्वविषये</u>

द्विष् + आनि → द्वेष् + आनि →'द्वेषाणि' इति रूपे **अट्कुप्वाङ्नुम्व्यवायेऽपि** (८.४.२) इत्यनेन णत्वं भवति | अत्र प्रश्नः उदेति यत् द्विष् + अन्ति इति स्थितौ अपि णत्वस्य निमित्तम् अस्ति | तर्हि अत्र का गतिः ? णत्वं भवति, न भवति, अथवा वैकल्पिकम् ?

कृ–धातोः अपि एवं प्रश्नः | कृ + उ + अन्ति → कुरु + अन्ति → रेफ–निमित्तत्वात् णत्वं भवेत् वा इति प्रश्नः | द्विष्–धातोः यथा षकारनिमित्तत्वं, तथा कृ–धातोः अपि रेफनिमित्तत्वात् णत्वं स्यात् |

तर्हि द्विष् + अन्ति इति स्थितिं परिशीलयाम | अत्र षकारः निमित्तभूतः; अग्रे स्थितस्य नकारस्य णत्वं प्राप्येत **अट्कुप्वाङ्नुम्व्यवायेऽपि** (८.४.२) इति सूत्रेण | परन्तु अत्र युगपत् सूत्रद्वयम् आयाति कार्यं कर्तुम्— **नश्चापदान्तस्य झलि** (८.३.२४), **अट्कुप्वाङ्नुम्व्यवायेऽपि** (८.४.२) च | **नश्चापदान्तस्य झलि** (८.३.२४) इत्यनेन नस्य मस्य च अपदान्तस्य झलि अनुस्वारः भवति | द्विषन्ति इत्यस्मिन् नकारः पदान्ते नास्ति, अतः **नश्चापदान्तस्य झलि** (८.३.२४) इत्यनेन नकारस्य अनुस्वारः प्राप्यते; अपि च **अट्कुप्वाङ्नुम्व्यवायेऽपि** (८.४.२) इत्यनेन तेन एव नकारेण णकारः अपि प्राप्यते | **नश्चापदान्तस्य झलि** (८.३.२४) इत्यनेन अनुस्वारे प्राप्ते, **अट्कुप्वाङ्नुम्व्यवायेऽपि** (८.४.२) इत्यनेन णकारे प्राप्ते, अत्र कः विधेयः ? अस्यां स्थितौ **पूर्वत्रासिद्धम्** (८.२.१) इत्यनेन णत्वे प्राप्ते असिद्धत्वात् अनुस्वारस्य प्रवृत्तिः भवति | त्रिपाद्यां पूर्वशास्त्रं प्रति परशास्त्रम् असिद्धम् | **नश्चापदान्तस्य झलि** (८.३.२४) इति पूर्वशास्त्रम्; **अट्कुप्वाङ्नुम्व्यवायेऽपि** (८.४.२) इति परशास्त्रम् | अनेन णत्वशास्त्रस्य असिद्धत्वात् अनुस्वार्स्य एव अवकाशः | तदा **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) इत्यनेन परसवर्णादेशः, अनेन पुनः नकारः आयाति |

द्विष् + अन्ति → **नश्चापदान्तस्य झलि** (८.३.२४) → दिषंति → **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) → द्विषन्ति

अधुना यः नकारः आयातः स च नूतनः, भिन्नसूत्रेण विहितश्च | अतः **अट्कुप्वाङ्नुम्व्यवायेऽपि** (८.४.२) अत्र पुनः णत्वं कर्तुम् उद्युक्तं स्यात् | परन्तु अत्र णत्वे कर्तव्ये **अट्कुप्वाङ्नुम्व्यवायेऽपि** (८.४.२) इति सूत्रस्य दृष्टौ **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) इत्यस्य कार्यम् असिद्धं, **पूर्वत्रासिद्धम्** (८.२.१) इति सूत्रेण | **अट्कुप्वाङ्नुम्व्यवायेऽपि** (८.४.२) इति सूत्रस्य दृष्टौ नकारः नास्त्येव अपि तु अनुस्वारः तदानीं वर्तते | अनुस्वारे सति णत्वप्रसक्तिः नास्ति |

प्रथमवारं शास्त्रासिद्धत्वात्, द्वितीयवारं कार्यासिद्धत्वात् णत्वं न भवति | द्विष् + अत्नि → द्विषन्ति | तथैव कुरु + अन्ति → कुर्वन्ति |

<u>षकारान्तः चक्षिङ् → चक्ष् धातुः</u> (आत्मनेपदी, व्यक्तायां वाचि)

a) अङ्गकार्यम्— उपधायां ककारः (लघु इक् इति न) अतः अङ्गकार्यं नास्ति |

b) सन्धिकार्यम्—

चक्ष् + ते → **स्कोः संयोगाद्योरन्ते च** → चष् + ते → **ष्टुना ष्टुः** → चष् + टे → चष्टे
चक्ष् + से → **स्कोः संयोगाद्योरन्ते च** → चष् + से → **षढोः कः सि** → चक् + से → **आदेशप्रत्यययोः** → चक् + षे → चक्षे
चक्ष् + ध्वे → **स्कोः संयोगाद्योरन्ते च** → चष् + ध्वे → **ष्टुना ष्टुः** → चष् + ढ्वे → **झलां जश् झशि**→ चड् + ढ्वे → चड्ढ्वे

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

सकारान्त वस → वस् धातुः (आत्मनेपदी, आच्छादने)

a) अङ्गकार्यम्— उपधायां ह्रस्व-अकारः (लघु इक् इति न) अतः अङ्गकार्यं नास्ति |

b) सन्धिकार्यम्—

सकारान्तधातुः अतः आधिक्येन केवलं वर्णमेलनं भवति | यथा सकारात् तकारे परे केवलं मेलनम् | वस् + ते → वस्ते |

धकारे परे सकारस्य लोपो भवति | वस् + ध्वे → सकारलोपः → वध्वे |

**धि च** (८.२.२५) = सकारस्य लोपो भवति धकारादि-प्रत्यये परे | धि सप्तम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **रात्सस्य** (८.२.२४) इत्यस्मात् **सस्य** इत्यस्य अनुवृत्तिः | **संयोगान्तस्य लोपः** (८.२.२३) इत्यस्मात् **लोपः** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्— **धि च सस्य लोपः** |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप-चिन्तनं करोतु |

रूपाणि
लटि —
लोटि—
लङि—
विधिलिङि—

अन्येऽपि सकारान्तधातवः तथैव भवन्ति |

सकारान्तः आस → आस् धातुः (आत्मनेपदी, उपवेशने)

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप-चिन्तनं करोतु |

रूपाणि
लटि —
लोटि—
लङि—
विधिलिङि—

सकारान्तः आङ्-उपसर्गपूर्वक-शासु → आशास् धातुः (आत्मनेपदी, इच्छायाम्)

अयं शासु-धातुः नित्यम् आङ्-उपसर्गपूर्वकः |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप-चिन्तनं करोतु |

रूपाणि
लटि —
लोटि—
लङि—
विधिलिङि—

सकारान्तः कसि → कन्स धातुः (आत्मनेपदी, गतिशासनयोः)

a) निरनुबन्धधातोः सिद्धिः—
नुमागमः | **इदितो नुम् धातोः** (७.१.५८) = यः धातुः इदित् अस्ति, तस्य नुमागमः भवति |

**मिदचोऽन्त्यात्परः** (१.१.४७) = यः आगमः मित् अस्ति, सः अच्–वर्णेषु अन्त्यात् परः आयाति |

कसि → **उपदेशेऽजनुनासिक इत्, हलन्त्यम्** → कस् → **इदितो नुम् धातोः**, **मिदचोऽन्त्यात्परः** → कन्स् इति धातुः |

b) सन्धिकार्यम्—

कन्स् + ते → **नश्चापदान्तस्य झलि** → कंस् + ते → वर्णमेलने → कंस्ते
कन्स् + ध्वे → **नश्चापदान्तस्य झलि** → कंस् + ध्वे → **धि च** → कं + ध्वे → **अनुस्वारस्य ययि परसवर्णः** → कन् + ध्वे → कन्ध्वे

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

<u>सकारान्तः णिसि → निन्स् धातुः</u> (आत्मनेपदी, चुम्बने)

a) निरनुबन्धधातोः सिद्धिः—
नुमागमः | **इदितो नुम् धातोः** (७.१.५८) = इदितः धातोः नुम् आगमो भवति | इदित् इत्युक्ते इत् इत् यस्य सः | तत्र प्रथमः इत् नाम ह्रस्वः इकारः* | द्वितीयः इत् नाम इत्–संज्ञा | ह्रस्व–इकारस्य इत्–संज्ञा यस्य, सः धातुः इदित् | इत् इत् यस्य स इदित् बहुव्रीहिः, तस्य इदितः | इदितः षष्ठ्यन्तं, नुम् प्रथमान्तं, धातोः षष्ठ्यन्तं, त्रिपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णम्— **इदितो धातोः नुम्** |

**मिदचोऽन्त्यात्परः** (१.१.४७) = यः आगमः मित् अस्ति, सः अच्–वर्णेषु अन्त्यात् परः आयाति |

नत्वम् | **णो नः** (६.१.६४) = उपदेशावस्थायां धातोः आदौ णकारः अस्ति चेत्, णकारस्य स्थाने नकारादेशः भवति | णोः षष्ठ्यन्तं, नः प्रथमान्तं, द्विपदमिदं सूत्रम् | **आदेच उपदेशेऽशिति** (६.१.४५) इत्यस्मात् **उपदेशे** इत्यस्य अनुवृत्तिः, **धात्वादेः षः सः** (६.१.६४) इत्यस्मात् **धात्वादेः** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **धात्वादेः णोः नः उपदेशे** |

णिसि → **उपदेशेऽजनुनासिक इत्** → णिस् → **इदितो नुम् धातोः**, **मिदचोऽन्त्यात्परः** → णिन्स् → **णो नः** → निन्स् इति धातुः |

b) सन्धिकार्यम्—

निन्स् + ते → **नश्चापदान्तस्य झलि** → निंस् + ते → वर्णमेलने → निंस्ते
निन्स् + ध्वे → **नश्चापदान्तस्य झलि** → निंस् + ध्वे → **धि च** → निं + ध्वे → **अनुस्वारस्य ययि परसवर्णः** → निन् + ध्वे → निन्ध्वे

अत्र प्रश्नः उदेति यत् लट्–लकारस्य से–प्रत्यये परे किमर्थं न **आदेशप्रत्यययोः** (८.३.५९) इत्यनेन षत्वं स्यात्? इकारः निमित्तं, 'से' इति सकारादिप्रत्ययः, मध्ये अनुस्वारः च सकारः च | **आदेशप्रत्यययोः** (८.३.५९) इति सूत्रे **नुंविसर्जनीयशर्व्यवायेऽपि** इत्यस्य अनुवृत्तिः, नाम एते मध्ये सन्ति चेदपि कार्यं भवति | किन्तु—काशिकायां दत्तम् अस्ति यत् एतेषु यत्किमपि एकं मध्ये भवितुमर्हति; एकस्मात् अधिकं भवति चेत् कार्यं न प्राप्नोति |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

<u>रूपाणि</u>

लटि —
लोटि—
लङि—
विधिलिङि—

<u>सकारान्तः षस → सस् धातुः</u> (परस्मैपदी, स्वप्ने)

a) निरनुबन्धधातोः सिद्धिः—

सत्वम् | **धात्वादेः षः सः** (६.१.६४) = उपदेशावस्थायां धातोः आदौ षकारः अस्ति चेत्, षकारस्य स्थाने सकारादेशो भवति | धातोः आदिः, धात्वादिः षष्ठीतत्पुरुषः; तस्य धात्वादेः | धात्वादेः षष्ठ्यन्तं, षः षष्ठ्यन्तं, सः प्रथमान्तं, त्रिपदमिदं सूत्रम् | **आदेच उपदेशेऽशिति** (६.१.४५) इत्यस्मात् **उपदेशे** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्— **धात्वादेः षः सः उपदेशे |**

षस → **उपदेशेऽजनुनासिक इत्** → षस् → **धात्वादेः षः सः** → सस् इति धातुः |

b) अङ्गकार्यम्— उपधायां ह्रस्व-अकारः (लघु इक् इति न) अतः अङ्गकार्यं नास्ति |

c) सन्धिकार्यम्—

लोटि—
सस् + हि → **हुझल्भ्यो हेर्धिः** → सस् + धि → **धि च** इत्यनेन स्-लोपः → सधि

लङि—
**हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** (६.१.६८) इत्यनेन हल्-उत्तरस्य अपृक्तसंज्ञक-प्रत्ययस्य लोपः | लङि त्-लोपः, स्-लोपश्च |

असस् + त् → **हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** → असस् → **तिप्यनस्तेः** इत्यनेन पदान्तस्य सकारस्य दकारादेशः → असद्
असस् + त् → उपरि इव → असद् → **वाऽवसाने** इत्यनेन विकल्पेन पदान्ते चर्त्वादिशः → असत्

**तिप्यनस्तेः** (८.२.७३) = पदान्तस्य सकारस्य दकारादेशो भवति तिपि परे; परन्तु अस्-धातौ न भवति | इदं सूत्रं **ससजुषो रुः** (८.२.६६) इत्यस्य अपवादः | न अस्तिः अनस्तिः, तस्य अनस्तेः | तिपि सप्तम्यन्तम्, अनस्तेः षष्ठ्यन्तं, द्विपदमिदं सूत्रम् | **ससजुषोः रुः** (८.२.६६) इत्यस्मात् **सः** इत्यस्य अनुवृत्तिः | **वसुस्रंसुध्वंस्वनडुहां दः** (८.२.७२) इत्यस्मात् **दः** इत्यस्य अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **पदस्य सः दः तिपि अनस्तेः** |

**ससजुषो रुः** (८.२.६६) = पदान्ते सकारस्य च सजुष्-शब्दस्य षकारस्य च स्थाने रु-आदेशो भवति | **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन पदान्तस्य वर्णस्य स्थाने रु-आदेशः | सश्च सजुश्च ससजुषौ, इतरेतरद्वन्द्वः, तयोः ससजुषोः | ससजुषोः षष्ठ्यन्तम्, रुः प्रथमान्तम्, द्विपदमिदं सूत्रम् | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **ससजुषोः पदस्य रुः** |

अत्र वस्तुतः **झलां जशोऽन्ते** (८.२.३९) इति अत्र सर्वसामान्यं सूत्रं; तस्य अपवादः **ससजुषो रुः** (८.२.६६); पुनः **ससजुषो रुः** इत्यस्य अपवादः **तिप्यनस्तेः** (८.२.७३) |

<u>लङ्-लकारस्य सिपि परे</u>

**सिपि धातो रुर्वा** (८.२.७४) इति सूत्रेण लङ्-लकारस्य स्-प्रत्यये परे सकारान्तपदस्य सकारस्य स्थाने विकल्पेन दकारादेशः रुत्वं वा भवति | यथा—

असस् + स् → **हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** इत्यनेन स्-लोपः → असस् → **सिपि धातो रुर्वा** (८.२.७४) इत्यनेन विकल्पेन रु-आदेशः → असद् / असरु → असरु चेत् उ इत्यस्य इत्-संज्ञा लोपश्च, **खरवसानयोर्विसर्जनीयः** (८.३.१५) इत्यनेन अवसाने र्-स्थाने विसर्गादिशः → असः | अपक्षे असद् → **वाऽवसाने** इत्यनेन विकल्पेन चर्-आदेशः → असत्

**सिपि धातो रुर्वा** (८.२.७४) = पदान्तस्य सकारस्य रु–आदेशो भवति, दकारो वा, सिपि परे | अत्र 'वा' इति समुच्चयार्थे | **येनविधिस्तदन्तस्य** (१.१.७२ ) इत्यनेन तदन्तविधिः; **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अन्तिमवर्णादिशः | '**धातोः**' उक्तं परसूत्राणाम् अर्थपूर्तिकृते; प्रकृतसूत्रे आवश्यकता नास्ति | सिपि सप्तम्यन्तं, धातोः षष्ठ्यन्तं, रुः प्रथमान्तं, वा अव्ययपदम्, अनेकपदमिदं सूत्रम् | **ससजुषोः रुः** (८.२.६६) इत्यस्मात् **सः** इत्यस्य अनुवृत्तिः | **वसुस्रंसुध्वंस्वनडुहां दः** (८.२.७२) इत्यस्मात् **दः** इत्यस्य अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रं— **सः धातोः पदस्य रुः दः वा सिपि** |

प्राचीनैः उच्यते यत् **सुस्रंसुध्वंस्वनडुहां दः** (८.२.७२) इत्यस्मात् **दः** इत्यस्य अनुवृत्त्या दकारस्य पक्षः सिध्यति साक्षात् अनेन एव **सिपि धातो रुर्वा** (८.२.७४) इति सूत्रेण | नवीनैः उच्यते यत् अस्यावश्यकता नास्ति यतोहि रु–अपक्षे स्–स्थाने दकारादेशः **झलां जशोऽन्ते** (८.२.३९) इत्यनेन | परन्तु अद्यत्वे आधिक्येन वैयाकरणाः वदन्ति यत् **ससजुषोः रुः** (८.२.६६), **झलां जशोऽन्ते** (८.२.३९) इत्यनयोर्मध्ये **ससजुषोः रुः** (८.२.६६) इत्यस्य अपवादभूतत्वात् **झलां जशोऽन्ते** (८.२.३९) इत्यस्य पुनः नितराम् अवकाशो नास्ति | इत्थञ्च **सिपि धातो रुर्वा** (८.२.७४) इत्यनेनैव रुश्च दश्च क्रियते |

अत्र दृष्टिः एवं— सकारान्तपदम् अस्ति चेत्, कीदृशं कार्यं स्यात् इति प्रश्नः | अस्मिन् प्रसङ्गे सर्वसामान्यं सूत्रं **झलां जशोऽन्ते** (८.२.३९) | सकारः झलि अस्ति; अनेन सूत्रेण पदान्ते सकारस्य जश्त्वं, नाम वर्गीयव्यञ्जनस्य तृतीयसदस्यः | **स्थानेऽन्तरतमः** (१.१.५०) इत्यनेन दन्त्य–सकारस्य स्थाने दन्त्य–तवर्गस्य तृतीयसदस्यः दकारः भवति | अतः सर्वसामान्य–सिद्धान्तः पदान्ते सकारस्य स्थाने दकारादेशः | परन्तु **ससजुषो रुः** (८.२.६६) तस्य अपवादः | अनेन पदान्ते स्थितस्य सकारस्य स्थाने रु–आदेशो भवति | पुनः तिप्–प्रत्यये परे **तिप्यनस्तेः** (८.२.७३) तस्य अपवादः | अनेन तिपि परे पदान्तस्य सकारस्य दकारादेशो भवति | एवमेव सिप्–प्रत्यये परे **सिपि धातो रुर्वा** (८.२.७४) **ससजुषो रुः** (८.२.६६) इत्यस्य अपवादः | अनेन सिपि परे पदान्तस्य सकारस्य रु–आदेशो दकारादेशश्च भवति | यथोक्तं **झलां जशोऽन्ते** (८.२.३९) इत्यनेन स्–स्थाने दकारः नोपलभ्यते यतोहि तत्तु बाधितं **ससजुषो रुः** (८.२.६६) इति सूत्रेण |

प्रश्नः उदेति यत् सिप् यदा आगतः तदा कथं वा धातुसंज्ञा स्यात् ? **सिपि धातो रुर्वा** (८.२.७४) इति सूत्रेण 'धातोः' अपि उक्तं, 'सिपि' अपि उक्तम् | अत्र वार्ता एवं— कस्य भागस्य का संज्ञा ? 'वस + ति' इति स्थितौ 'वस' इति अङ्गस्य धातुसंज्ञा नास्ति; तत्र किन्तु 'वस्' इति अन्तर्निहितभागस्य धातुसंज्ञा तु तदानीमपि अस्त्येव | एवमेव सिपः विधानानन्तरमपि धातोः धातुसंज्ञा तिष्ठति | यथा 'असस् + स्' इत्यत्र 'असस् + स्' इत्यस्य पदसंज्ञा, 'असस्' इत्यस्य धातुसंज्ञा | तदा स्–प्रत्ययलोपानन्तरम्, 'असस्' इत्यस्य धातुसंज्ञा अपि भवति, पदसंज्ञा अपि भवति |

**खरवसानयोर्विसर्जनीयः** (८.३.१५) = पदान्ते स्थितस्य रेफस्य स्थाने विसर्गादिशो भवति खरि अवसाने च परे | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन रेफान्तस्य पदस्य; **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन पदान्तस्य रेफस्य स्थाने विसर्गादिशः | खृ च अवसानं च तयोरितरेतरयोगद्वन्द्वः खरवसाने, तयोः खरवसानयोः | खरवसानयोः सप्तम्यन्तं, विसर्जनीयः प्रथमान्तं, द्विपदमिदं सूत्रम् | **रो रि** (८.३.१४) इत्यस्मात् **रः** इत्यस्य अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **रः पदस्य विसर्जनीयः खरवसानयोः संहितायाम्** |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

<u>सकारान्तः अस → अस् धातुः</u> ( परस्मैपदी, भुवि)

a) अङ्गकार्यम्—
१) हलादि पित्सु = उपधायां ह्रस्व–अकारः (लघु इक् इति न) अतः गुणकार्यं नास्ति
२) अजादि पित्सु = उपधायां ह्रस्व–अकारः (लघु इक् इति न) अतः गुणकार्यं नास्ति
३) हलाद्यपित्सु = **श्नसोरल्लोपः** इत्यनेन अस्–धातोः अकार–लोपः | अस् + तः → स् + तः → स्तः
४) अजाद्यपित्सु = **श्नसोरल्लोपः** इत्यनेन अस्–धातोः अकार–लोपः | अस् + अन्ति → स् + अन्ति → सन्ति

**श्नसोरल्लोपः** (६.४.१११) = श्नम्–प्रत्ययस्य अपि च अस्–धातोः अकारस्य लोपो भवति किति ङिति सार्वधातुके परे | श्नश्च अस् च तयोरितरेतरद्वन्द्वः श्नसौ | श्नसोः षष्ठ्यन्तम्, अल्लोपः प्रथमान्तं, द्विपदमिदं सूत्रम् | **अत उत्सार्वधातुके** (६.४.११०) इत्यस्मात् **सार्वधातुके** इत्यस्य अनुवृत्तिः; **गमहनजनखनघसां लोपः क्ङित्यनङि** (६.४.९८) इत्यस्मात् **क्ङिति** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अङ्गस्य श्नसोः अल्लोपः सार्वधातुके क्ङिति** |

लटि—
अस् + सि → **तासस्त्योर्लोपः** इत्यनेन अस्–धातोः सकार–लोपः → अ + सि → असि

**तासस्त्योर्लोपः** (७.४.५०) = तास्–प्रत्ययस्य अपि च अस्–धातोः सकारस्य लोपो भवति सकारादि–प्रत्यये परे | **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन तास्–प्रत्ययस्य, अस्–धातोः च अन्तिमवर्णलोपः न तु पूर्णाङ्गस्य | ताश्च अस्तिश्च तयोरितरेतरद्वन्द्वः तासस्ती, तयोः तासस्त्योः | तासस्त्योः षष्ठ्यन्तं, लोपः प्रथमान्तं, द्विपदमिदं सूत्रम् | **सः स्यार्धधातुके** (७.४.४९) इत्यस्मात् **सि** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अत्र **सि** इत्युक्ते सकारादि–प्रत्यये परे यतः **अङ्गस्य** इत्यस्य अधिकरः; अङ्गं तदा उच्यते यदा यः परे अस्ति सः प्रत्ययः | अनुवृत्ति–सहितसूत्रम्— **तासस्त्योः अङ्गस्य लोपः सि** |

अत्र प्रश्नः उदेति यत् **सः स्यार्धधातुके** (७.४.४९) इत्यस्मात् केवलं **सि** इत्यस्य अनुवृत्तिः भवति वा, **सः** इत्यस्यापि भवेत् वा ? सकारस्य स्थाने लोपादेशो भवति, अतः तस्यापि अनुवृत्तिः भवतु इति प्रश्नः | सिद्धान्तकौमुद्याम् उच्यते यत् **सः** इति अनुवृत्तेः आवश्यकता नास्ति यतोहि **तासस्त्योः** इति पदं षष्ठीविभक्तौ अतः **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अन्तिमवर्णः एव स्थानी इति सिध्यति | काशिकायां **सः** इत्यस्य अनुवृत्तिः प्रदर्श्यते, किन्तु अद्यत्वे वैयाकरणानां मतं यत् सा च अनुवृत्तिः नापेक्षिता |

लोटि—

अस् + हि → **घ्वसोरेद्धावभ्यासलोपश्च** इत्यनेन अस्–स्थाने एकारादेशः, **अलोऽन्त्यस्य** इत्यनेन अन्तिमवर्णस्य (सकारस्य) स्थाने एव आदेशः → अए + हि → **हुझल्भ्यो हेर्धिः** इत्यनेन हि–स्थाने धि → अए + धि → हि अपित् अतः **श्नसोरल्लोपः** इत्यनेन अ–लोपः → ए + धि → एधि

**घ्वसोरेद्धावभ्यासलोपश्च** (६.४.११९) = घुसंज्ञक–धातोः अस्–धातोः च स्थाने एकारादेशो भवति हि–प्रत्यये परे; अभ्यासः अस्ति चेत् तस्य (अभ्यासस्य) लोपः | **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अन्तिमवर्णस्य (सकारस्य) स्थाने एव आदेशः | घुश्च अस् च तयोरितरेतरद्वन्द्वः घ्वसौ, तयोः घ्वसोः | घ्वसोः षष्ठ्यन्तम्, एत् प्रथमान्तं, हौ सप्तम्यन्तम्, अभ्यासलोपः प्रथमान्तं, च अव्ययपदम्, अनेकपदमिदं सूत्रम् | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **घ्वसोः अङ्गस्य एत् हौ अभ्यासलोपः च** |

**हुझल्भ्यो हेर्धिः** (६.४.१०१) = हु–धातुतः झलन्तेभ्यः धातुभ्यश्च हि–प्रत्ययस्य स्थाने धि–आदेशो भवति | **येनविधिस्तदन्तस्य** (१.१.७२) इत्यनेन झलेभ्यः इति विशेषणेन तेभ्यः अङ्गेभ्यः येषाम् अन्ते झल् | हुश्च झलश्च तेषामितरेतरद्वन्द्वो हुझलः, तेभ्यो हुझल्भ्यः | हुझल्भ्यः पञ्चम्यन्तं, हेः षष्ठ्यन्तं, धिः प्रथमान्तं, त्रिपदमिदं सूत्रम् | **अङ्गस्य** (६.४.११) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **हुझल्भ्यः अङ्गेभ्यः हेः धिः** |

'अए + हि' इत्यवस्थायाम् अए इति झलन्तं न, अतः हि–स्थाने धि नाभविष्यत्; परन्तु **असिद्धवदत्राभात्** इत्यनेन **हुझल्भ्यो हेर्धिः** इत्यस्य सूत्रस्य दृष्ट्या **घ्वसोरेद्धावभ्यासलोपश्च** इत्यस्य सूत्रस्य कार्यम् असिद्धम् | अतः हि–प्रत्ययः 'अस्' इत्येव पश्यति न तु 'अए'; अनेन कारणेन हि–स्थाने धि–आदेशो भवति |

**असिद्धवदत्राभात्** (६.४.२२) = कमपि आश्रयम् अधिकृत्य आभीय–कार्यं, द्वितीयं समानाश्रितम् आभीय–कार्यं प्रति असिद्धं भवति | अधिकारसूत्रम् | **भस्य** (६.४.१२९) इति अधिकारसूत्रेण भ–संज्ञा सम्बद्धकार्याणि भवन्ति षष्ठाध्ययस्य अन्तपर्यन्तम् | **असिद्धवदत्राभात्** (६.४.२२) इत्यनेन ६.४.२३ इत्यस्मात् आरभ्य, **भस्य** इत्यस्य अधिकारस्य अन्तपर्यन्तम्, एषां कार्याणां नाम आभीय–कार्यम् | सूत्रं स्वयं सम्पूर्णम्— **असिद्धवत् अत्र आ भात्** |

तुल्यबलविरोधविषये शैलीद्वयं दृश्यते | द्वयोः किन्तु फलं समानम् | मातृभिः उच्यते यत् तुल्यबलविरोधः तदा भवति यदा द्वयोः सूत्रयोः निमित्तप्रसङ्गे स्थानिप्रसङ्गे वा सङ्घर्षो वर्तते | अतः अत्र प्रकृतौ **घ्वसोरेद्धावभ्यासलोपश्च** (६.४.११९), **हुझल्भ्यो हेर्धिः** (६.४.१०१) च

अनयोः सङ्घर्षः अस्ति। **घ्वसोरेद्धावभ्यासलोपश्च** (६.४.११९) इति सूत्रे स्थानी सकारः, निमित्तञ्च हि–प्रत्ययः; **हुझल्भ्यो हेर्धिः** (६.४.१०१) इति सूत्रे स्थानी हि–प्रत्ययः, निमित्तं झलप्रत्याहारस्थः सकारः। अतः **विप्रतिषेधे परं कार्यम्** (१.४.२) इत्यनेन परसूत्रस्य **घ्वसोरेद्धावभ्यासलोपश्च** (६.४.११९) इत्यस्य कार्यम्। अधुना वस्तुतस्तु **घ्वसोरेद्धावभ्यासलोपश्च** (६.४.११९) इत्यस्य अस्–दलस्य अन्यत्रलब्धावकाशो नास्ति इति कृत्वैव बलमिति भवति; तस्मात् प्रक् किन्तु तादृशसङ्घर्षचिन्तनं कर्तुं शक्यते शिक्षार्थम्। किन्तु **श्नसोरल्लोपः** (६.४.१११) इत्यस्य तादृशसङ्घर्षो नास्ति यतोहि तस्य निमित्तमस्ति कित् ङित् सार्वधातुकप्रत्ययः। नाम हि–प्रत्ययः अस्ति चेदपि तथा, धि–प्रत्ययः अस्ति चेदपि तथैव। अतः तस्य विरोधो नास्ति। तदर्थं मातृभिरुच्यते यत् प्रथमं **घ्वसोरेद्धावभ्यासलोपश्च** (६.४.११९), तदा **हुझल्भ्यो हेर्धिः** (६.४.१०१), तदा च **श्नसोरल्लोपः** (६.४.१११)।

भिन्ना शैली उच्यते शृङ्गेर्याचार्यैः। तैः उच्यते यत् द्वयोः अन्यत्र चरितार्थयोः अचरितार्थयोः एकत्रसमावेशः तुल्यबलविरोधः। नाम यत्र कुत्रापि द्वयोः सूत्रयोः एकत्रप्राप्तिरस्ति, अपि च तयोः अन्यत्र चारितार्थ्यं वा उभयोः अचारितार्थ्यं वा अस्ति, तत्र तुल्यबलविरोधः वर्तते। अस्मिन् चिन्तनविधौ स्थानी समानः अथवा निमित्तसङ्घर्षः इति किमपि नास्ति; केवलम् एकस्यां प्रक्रियायां एकस्मिन् काले युगपत् प्राप्तिः इत्यनेन एकत्रप्राप्तिः। तदा अन्यत्र द्वयोः चारितार्थ्यं, नाम द्वयोः अन्यत्र लब्धावकाशः, अथवा द्वयोरपि अन्यत्र अचारितार्थ्यं, नाम लब्धावकाशो न, इति चेत् तुल्यबलविरोधः। अतः प्रकृतौ त्रयाणामपि तुल्यबलविरोधो वर्तते यतोहि एकस्मिन् काले युगपत् प्राप्तिरस्ति, अपि च अन्यत्र चारितार्थ्यम् अस्ति। अन्ततो गत्वा **घ्वसोरेद्धावभ्यासलोपश्च** (६.४.११९) बलवत् प्रतिपदोक्तत्वात्। प्रतिपदोक्तत्वं परत्वात् बलवत्।

एध् + लट् → **अनुदात्तङित आत्मनेपदम्** (१.३.१२), **कर्तरि शप्** (६.१.६८) → तिङ्–भावी तिङ् भवति इति कृत्वा युगपत्–प्राप्तिः, तुल्यबलविरोधश्च (यद्यपि स्थानी समानो नास्ति)।

लङि—

आ + अस् + त् → **अस्तिसिचोऽपृक्ते** इत्यनेन अपृक्तसंज्ञक–हल्–प्रत्ययस्य ईट्–आगमः → आ + अस् + ई + त् → वर्णमेलने → आसीत्

आ + अस् + स् → **अस्तिसिचोऽपृक्ते** इत्यनेन अपृक्तसंज्ञक–हल्–प्रत्ययस्य ईट्–आगमः → आ + अस् + ई + स् → वर्णमेलने → आसीः

ईट्–आगमः टित् अतः त् इत्यस्य आदौ आयातीति। सामान्यतया अपृक्तसंज्ञक–हल्–प्रत्ययस्य लोपो भवति हलन्तधातुतः परन्तु अत्र लोपो न भवति यतोहि मध्ये ईडागमोऽस्तीति।

**अस्तिसिचोऽपृक्ते** (७.३.९६) = सिच्–प्रत्ययात् अपि च अस्–धातुतः अपृक्तसंज्ञक–हल्–प्रत्ययस्य ईडागमो भवति। अस्तिश्च सिच् च तयोः समाहारद्वन्द्वः अस्तिसिच्, तस्मात् अस्तिसिचः। अस्तिसिचः पञ्चम्यन्तं, अपृक्ते सप्तम्यन्तं, द्विपदमिदं सूत्रम्। **अतो वृद्धिर्लुकि हलि** (७.३.८९) इत्यस्मात् **हलि** इत्यस्य अनुवृत्तिः, **ब्रुव ईट्** (७.३.९३) इत्यस्मात् **ईट्** इत्यस्य अनुवृत्तिः। **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः। अनुवृत्ति–सहितसूत्रम्— **अस्तिसिचः अङ्गात् ईट् अपृक्ते हलि**।

**आद्यन्तौ टकितौ** (१.१.४६) = यस्य आगमः टित्, तस्य आदौ आयाति; यस्य आगमः कित्, तस्य अन्ते आयाति। आदिश्च अन्तश आद्यन्तौ, टश्च कश्च टकौ, इतरेतरद्वन्द्वः, टकौ इतौ ययोः तौ टकितौ, बहुव्रीहिः। आद्यन्तौ प्रथमान्तं, टकितौ प्रथमान्तं, द्विपदमिदं सूत्रम्। सूत्रं स्वयं सम्पूर्णम्— **आद्यन्तौ टकितौ**।

अत्र प्रश्नः उदेति यत् लङ्लकारस्य प्रथमपुरुषद्विवचने अकारलोपः भवति वा ? आ + अस् + ताम्। यतोहि आडागमः विधीयते लकारावस्थायाम् **आडजादीनाम्** (६.४.७२) इति सूत्रेण, तदा **आटश्च** (६.१.८९) इत्यनेन आडागमात् अचि परे पूर्वपरयोः वृद्धिरेकादेशः। तदानीम् अकारः एव नास्ति, अतः कथं वा **श्नसोरल्लोपः** (६.४.१११) इत्यनेन अकारलोपः स्यात् ? अस्य उत्तरम् अस्ति यत् **आडजादीनाम्** (६.४.७२) इति सूत्रेण आडागमः विधीयते लकारावस्थायाम् इति तु सत्यं, किन्तु **आटश्च** (६.१.८९) इत्यनेन वृद्धिरादेशः तत्र साक्षात् न भवति। इदं सन्धिकार्यं; **श्नसोरल्लोपः** (६.४.१११) अङ्गकार्यं, परसूत्रं च। अतः अडागमानन्तरं **श्नसोरल्लोपः** (६.४.१११) इत्यनेन अकारलोपः; तदा तु **आटश्च** (६.१.८९) इत्यस्य अवसरः एव नास्ति।

अस् + लङ् → **आडजादीनाम्** (६.४.७२) → आ + अस् + लङ् → आ + अस् + ताम् → **श्नसोरल्लोपः** (६.४.१११) → आ + स् + ताम् → आस्ताम्

**आडजादीनाम्** (६.४.७२) = लुङ् लङ् लृङ् च परे चेत्, अजादिधातुरूपि–अङ्गस्य आट्–आगमो भवति; स च अडागमः उदात्त–संज्ञकः। **आद्यन्तौ टकितौ** (१.१.४६) इत्यनेन अङ्गात् प्राक् आयाति। अच् आदिर्येषां ते, अजादयः बहुव्रीहिः; तेषाम् अजादीनाम्। आट् प्रथमान्तम्,

अजादीनाम् षष्ठ्यन्तं, द्विपदमिदं सूत्रम् | **लुङ्लङ्लृङ्क्ष्वडुदात्तः** (६.४.७१) इत्यस्मात् **लुङ्लङ्लृङ्क्षु, उदात्तः** इत्यनयोः अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **अजादीनाम् अङ्गस्य आट् उदात्तः लुङ्लङ्लृङ्क्षु** |

**आटश्च** (६.१.८९) = आडागमात् अचि परे पूर्वपरयोः वृद्धिरेकादेशो भवति | आटः पञ्चम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **इको यणचि** (६.१.७७) इत्यस्मात् **अचि** इत्यस्य अनुवृत्तिः | **वृद्धिरेचि** (६.१.८७) इत्यस्मात् **वृद्धिः** इत्यस्य अनुवृत्तिः | **एकः पूर्वपरयोः** (६.१.८४), **संहितायाम्** (६.१.७१) इत्यनयोः अधिकारः | अनुवृत्ति-सहितसूत्रम्— **आटः च अचि पूर्वपरयोः एकः वृद्धिः संहितायाम्** |

b) सन्धिकार्यम्—सकारान्तधातुः अतः आधिक्येन केवलं वर्णमेलनं भवति | यथा सकारात् तकारे परे केवलं मेलनम् | अस् + ति → अस्ति |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप-चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

<u>हकारान्तः दुह → दुह् धातुः</u> (उभयपदी, प्रपूरणे)

a) अङ्गकार्यम्—
१) हलादि पित्सु = उपधायां लघु-इकः गुणः | दुह् + ति → **पुगन्तलघूपधस्य च** → दोह् + ति → सन्धिकार्यम् → दोग्धि
२) अजादि पित्सु = उपधायां लघु-इकः गुणः | दुह् + आनि → **पुगन्तलघूपधस्य च** → दोह् + आनि → दोहानि
३) हलाद्यपित्सु = **क्ङिति च**, गुणनिषेधः | दुह् + तः → सन्धिकार्यमेव → दुग्धः
४) अजाद्यपित्सु = **क्ङिति च**, गुणनिषेधः | दुह् + अन्ति → वर्णमेलनमेव → दुहन्ति

b) सन्धिकार्यम्—

दकारादि-हकारान्तधातूनां सन्धिकार्यं चतुर्विधम्—

१. <u>दकारादि-हकारान्तधातुतः **त**कारादि **थ**कारादि च प्रत्ययानां योजनविधिः</u>

- तकारादि थकारादि च प्रत्यये परे, दकारादि-हकारान्तधातोः धात्वन्तस्य हकारस्य स्थाने घकारादेशो भवति **दादेर्धातोर्घः** इत्यनेन सूत्रेण |
- अधुना प्रत्ययः झष्-परतः अस्ति, अतः प्रत्ययादौ स्थितस्य तकारस्य थकारस्य च ध्-आदेशो भवति **झषस्तथोर्धोऽधः** इति सूत्रेण |
- अधुना धातु-परतः झश् अस्ति (धकारः), अतः धात्वन्ते घ्-स्थाने तृतीयादेशो भवति **झलां जश् झशि** इति सूत्रेण | जश्त्वसन्धिरिति |

दुह् + ति → गुणकार्यम् → दोह् + ति → **दादेर्धातोर्घः** इत्यनेन ह्-स्थाने घ्-आदेशः → दोघ् + ति → **झषस्तथोर्धोऽधः** इत्यनेन त्-स्थाने ध्-आदेशः → दोघ् + धि → **झलां जश् झशि** इत्यनेन घ्-स्थाने ग्-आदेशः → दोग् + धि → दोग्धि
दुह् + थः → **दादेर्धातोर्घः** → दुघ् + थः → **झषस्तथोर्धोऽधः** → दुघ् + धः → **झलां जश् झशि** → दुग् + धः → दुग्धः

२. <u>दकारादि-हकारान्तधातुतः **स**कारादि-प्रत्ययानां योजनविधिः</u>

- सकारादि-प्रत्यये परे, दकारादि-हकारान्तधातोः धात्वन्तस्य हकारस्य स्थाने घकारादेशो भवति **दादेर्धातोर्घः** इत्यनेन सूत्रेण |
- तदा आदौ स्थितस्य दकारस्य धकारादेशो भवति **एकाचो बशो भष् झषन्तस्य स्ध्वोः** इत्यनेन |
- ख् परे अस्ति अतः **खरि च** इत्यनेन घकारस्य स्थाने ककारादेशो भवति |

- कवर्गीयवर्णः पूर्वम् अस्ति अतः **आदेशप्रत्यययोः** इत्यनेन स्–स्थाने षत्वम् |

दुह् + सि → गुणकार्यम् → दोह् + सि → **दादेर्धातोर्घः** → दोघ् + सि → **एकाचो बशो भष् झषन्तस्य स्ध्वोः** → धोघ् + सि → **खरि च** → धोक् + सि → **आदेशप्रत्यययोः** → धोक् + षि → धोक्षि

३. <u>दकारादि–हकारान्तधातुतः **ध**कारादि–प्रत्ययानां योजनविधिः</u>

- धकारादि प्रत्यये परे, दकारादि–हकारान्तधातोः धात्वन्तस्य हकारस्य स्थाने घकारादेशो भवति **दादेर्धातोर्घः** इत्यनेन सूत्रेण |
- धात्वन्ते घ्–स्थाने तृतीयादेशो भवति **झलां जश् झशि** इति सूत्रेण | जश्त्वसन्धिरिति |

दुह् + हि → **हुझल्भ्यो हेर्धिः** → दुह् + धि → **दादेर्धातोर्घः** इत्यनेन ह्–स्थाने घ्–आदेशः → दुघ् + धि → **झलां जश् झशि** इत्यनेन घ्–स्थाने ग्–आदेशः → दुग् + धि → दुग्धि

४. <u>दकारादि–हकारान्तधातुतः **ध्वे**–प्रत्ययस्य योजनविधिः</u>

- ध्वे–प्रत्यये परे, दकारादि–हकारान्तधातोः धात्वन्तस्य हकारस्य स्थाने घकारादेशो भवति **दादेर्धातोर्घः** इत्यनेन सूत्रेण |
- अधुना एकाच्–बशादि–झषन्तधातुः जातः (३४ इति) | अतः **एकाचो बशो भष् झषन्तस्य स्ध्वोः** इत्यनेन **(**३४ – ४४) आदौ तृतीयसदस्य स्थाने चतुर्थसदस्यादेशो भवति |
- धात्वन्ते घ्–स्थाने तृतीयादेशो भवति **झलां जश् झशि** इति सूत्रेण | जश्त्वसन्धिरिति |

दुह् + ध्वे → **दादेर्धातोर्घः** इत्यनेन ह्–स्थाने घ्–आदेशः → दुघ् + ध्वे → **एकाचो बशो भष् झषन्तस्य स्ध्वोः** इत्यनेन बशः भष्–आदेशः → धुघ् + ध्वे → **झलां जश् झशि** इत्यनेन घ्–स्थाने ग्–आदेशः → धुग् + ध्वे → धुग्ध्वे

लङि—
अदोह् + त् → हल्–परतः अपृक्तसंज्ञक–प्रत्ययस्य लोपः → अदोह् → **दादेर्धातोर्घः** → अदोघ् → **एकाचो बशो भष् झषन्तस्य स्ध्वोः** → अधोघ् → **झलां जशोऽन्ते** → अधोग् → **वाऽवसाने** इत्यनेन विकल्पेन चर्त्वादेशः → अधोक्

**हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** (६.१.६८, लघु० १७९) = हल्–परतः अपृक्तसंज्ञक–प्रत्ययस्य लोपः | लङि त्–लोपः, स्–लोपश्च |

**दादेर्धातोर्घः** (८.२.३२) = झलि पदान्ते च, दकारादिधातोः हकारस्य स्थाने घकारादेशो भवति | दः आदौ यस्य स दादिः, तस्य दादेः, बहुव्रीहीः | दादेः षष्ट्यन्तं, धातोः षष्ठ्यन्तं, घः प्रथमान्तं, त्रिपदमिदं सूत्रम् | **हो ढः** इत्यस्मात् **हः** इत्यस्य अनुवृत्तिः | **झलो झलि** इत्यस्मात् **झलि** इत्यस्य अनुवृत्तिः | **पदस्य** इत्यस्य अधिकारः | अनुवृत्ति–सहितं सूत्रम्— **दादेः धातोः हः घः झलि पदस्य च अन्ते** इति |

**झषस्तथोर्धोऽधः** (८.२.४०) = झष्–उत्तरस्य तकारथकारयोः स्थाने धकारादेशो भवति, धा–धातुं वर्जयित्वा | तस्च थ् च तथौ इतरेतरद्वन्द्वः; तयोः, तथोः | तकारोत्तर–अकारः उच्चारणार्थम् अस्ति; अग्रे 'धः' इत्यस्य धकारोत्तर–अकारः अपि तथ | न धा, अधा नञ्तत्पुरुषः, तस्मात् अधः | झषः पञ्चम्यन्तं, तथोः षष्ठ्यन्तं, धः प्रथमान्तम्, अधः पञ्चम्यन्तम्, अनेकपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णम् — **झषः तथोः धः अधः** |

**एकाचो बशो भष् झषन्तस्य स्ध्वोः** इत्यस्य अनौपचारिकोऽर्थः— एकाच्–धातोः आदौ बश् (ब, ग, ड, द) अपि च अन्ते झष् (झ, भ, घ, ढ, ध), तस्य धातोः नाम एकाच्–बशादि–झषन्तधातुः इति | यथा बन्ध्–धातुः, बुध्–धातुः च | हकारान्तधातुः चेत् झलि पदान्ते च हकारस्य स्थाने झषादेशः भवति (उदा— दुह् → दुघ्), अतः तत्रापि बशादि–झषन्तधातुः प्राप्यते | एकाच्–बशादि–झषन्तधातोः आदौ स्थितस्य बशः स्थाने भषादेशो भवति (भ, घ, ढ, ध) सकारादि–प्रत्यये परे, ध्व–शब्दे परे, पदान्ते च | अतः वदामः यत् "३४ → ४४" इत्युक्तौ यत्र धातोः आदौ वर्गस्य तृतीयसदस्यः (३), अन्ते च वर्गस्य चतुर्थसदस्यः (४), तत्र आदौ स्थितस्य तृतीयसदस्यस्य स्थाने चतुर्थसदस्यादेशो भवति (३ → ४ ) | आहत्य ३४ → ४४ इति विकारः |

**एकाचो बशो भष् झषन्तस्य स्ध्वोः** (८.२.३७) = धातोरवयवो यो झषन्त एकाच्, तस्य बशः भषादेशो भवति सकारादि–प्रत्यये परे, ध्व–शब्दे परे, पदान्ते च | एकोऽच् यस्मिन् स एकाच् बहुव्रीहिः, तस्य एकाचः | झष् अन्ते यस्य स झषन्तः बहुव्रीहिः, तस्य झषन्तस्य | स् च ध्व्

च स्ध्वौ इतरेतरद्वन्द्वः, तयोः स्ध्वोः | एकाचः षष्ठ्यन्तं, बशः षष्ठ्यन्तं, भष् प्रथमान्तं, झषन्तस्य षष्ठ्यन्तं, स्ध्वोः सप्तम्यन्तं, अनेकपदमिदं सूत्रम् | **दादेर्धातोर्घः** (८.२.३२) इत्यस्मात् **धातोः** इत्यस्य अनुवृत्तिः | **स्कोः संयोगाद्योरन्ते च** (८.२.२९) इत्यस्मात् **अन्ते**, **च** इत्यनयोः अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **धातोः झषन्तस्य एकाचः बशः भष् स्ध्वोः पदस्य अन्ते च** |

परस्मैपदे आत्मनेपदे च—
अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप-चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

<u>हकारान्तः दिह → दिह् धातुः</u> (उभयपदी, उपचये)

सर्वं दुह-धातुवत् भवति; अङ्गकार्यम् अपि सन्धिकार्यम् अपि तथा |

a) अङ्गकार्यम्—
१) हलादि पित्सु = उपधायां लघु-इकः गुणः | दिह् + ति → **पुगन्तलघूपधस्य च** → देह् + ति → सन्धिकार्यम् → देग्धि
२) अजादि पित्सु = उपधायां लघु-इकः गुणः | दिह् + आनि → **पुगन्तलघूपधस्य च** → देह् + आनि → देहानि
३) हलाद्यपित्सु = **क्ङिति च**, गुणनिषेधः | दिह् + तः → सन्धिकार्यमेव → दिग्धः
४) अजाद्यपित्सु = **क्ङिति च**, गुणनिषेधः | दिह् + अन्ति → वर्णमेलनमेव → दिहन्ति

b) सन्धिकार्यम्—
उपरि यथा दुह-धातोः कार्यं तथैव |

परस्मैपदे आत्मनेपदे च—
अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप-चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

<u>हकारान्तः लिह → लिह् धातुः</u> (उभयपदी, आस्वादने)

a) अङ्गकार्यम्—
१) हलादि पित्सु = उपधायां लघु-इकः गुणः | लिह् + ति → **पुगन्तलघूपधस्य च** → लेह् + ति → सन्धिकार्यम् → लेढि
२) अजादि पित्सु = उपधायां लघु-इकः गुणः | लिह् + आनि → **पुगन्तलघूपधस्य च** → लेह् + आनि → लेहानि
३) हलाद्यपित्सु = **क्ङिति च**, गुणनिषेधः | लिह् + तः → सन्धिकार्यमेव → लीढः
४) अजाद्यपित्सु = **क्ङिति च**, गुणनिषेधः | लिह् + अन्ति → वर्णमेलनमेव → लिहन्ति

b) सन्धिकार्यम्—

हकारान्तधातूनां सन्धिकार्यं त्रिविधम्—

१. <u>हकारान्तधातुतः **त**कारादि **थ**कारादि च प्रत्ययानां योजनविधिः</u>

- तकारादि थकारादि च प्रत्यये परे, धात्वन्तस्य हकारस्य स्थाने ढकारादेशो भवति, **हो ढः** इत्यनेन सूत्रेण |
- प्रत्ययादौ स्थितस्य तकारस्य थकारस्य च ध्–आदेशो भवति **झषस्तथोर्धोऽधः** इति सूत्रेण |
- प्रत्ययादौ स्थितस्य धकारस्य स्थाने ढ्–आदेशो भवति **ष्टुना ष्टुः** इति सूत्रेण |
- पूर्वतनस्य ढ्–लोपो भवति **ढो ढे लोपः** इति सूत्रेण |

लिह् + ति → **पुगन्तलघूपधस्य च** इत्यनेन गुणः → लेह् + ति → **हो ढः** इत्यनेन झलि परे ह्–स्थाने ढ्–आदेशः → लेढ् + ति → **झषस्तथोर्धोऽधः** इत्यनेन त्–स्थाने ध्–आदेशः → लेढ् + धि → **ष्टुना ष्टुः** इत्यनेन ष्टुत्वम् → लेढ् + ढि → **ढो ढे लोपः** इत्यनेन पूर्वतनस्य ढकारस्य लोपः → ले + ढि → लेढि

विशेषः—

ढ्, ॒ इत्यनयोर्लोपानन्तरं तयोः पूर्वस्थितस्य अण् (अ, इ, उ) इत्यस्य दीर्घादेशो भवति | यथा—

लिह् + तः → **हो ढः** → लिढ् + तः → **झषस्तथोर्धोऽधः** → लिढ् + धः → **ष्टुना ष्टुः**→ लिढ् + ढः → **ढो ढे लोपः** → लि + ढः → **ढ्रलोपे पूर्वस्य दीर्घोऽणः** इत्यनेन ढ् इत्यस्य लोपानन्तरं पूर्वस्थितस्य अणः दीर्घादेशः → ली + ढः → लीढः

अत्र प्रश्नः उदेति— **ढो ढे लोपः** (८.३.१३) इति पूर्वत्रिपादिसूत्रं, **ष्टुना ष्टुः** (८.४.४१) इति परत्रिपादिसूत्रम् | तर्हि किमर्थं **पूर्वत्रासिद्धम्** (८.२.१) इत्यनेन **ष्टुना ष्टुः** (८.४.४१) इत्यस्य कार्यम् असिद्धं न भवेत् ?

उत्तरमिदं यत् 'आश्रयात् सिद्धम्' | वस्तुतः यत्र कुत्रापि **ढो ढे लोपः** (८.३.१३) इति सूत्रं प्रवर्तते, तस्मात् पूर्वं **ष्टुना ष्टुः** (८.४.४१) प्रवर्तते एव | सम्पूर्ण–संस्कृतभाषायां कुत्रापि नास्ति यत्र **ढो ढे लोपः** (८.३.१३) भवति किन्तु तस्मात् पूर्वं **ष्टुना ष्टुः** (८.४.४१) न स्यात् | अस्यां दशायां **पूर्वत्रासिद्धम्** (८.२.१) इत्यनेन **ढो ढे लोपः** (८.३.१३) इत्यस्य मनसि **ष्टुना ष्टुः** (८.४.४१) इत्यस्य कार्यम् असिद्धं चेत् **ढो ढे लोपः** (८.३.१३) इत्यस्य प्रवर्तनं न कुत्रापि भवेत्; निरवकाशं स्यात् | तदर्थं **ढो ढे लोपः** (८.३.१३) इति सूत्रं **ष्टुना ष्टुः** (८.४.४१) इति सूत्रस्य आश्रये अस्ति इति कृत्वा 'आश्रयात् सिद्धम्' इत्युच्यते | अनेन कारणेन **ढो ढे लोपः** (८.३.१३) न बाधितं **पूर्वत्रासिद्धम्** (८.२.१) इति सूत्रेण |

२. <u>हकारान्तधातुतः **स**कारादि–प्रत्ययानां योजनविधिः</u>

- सकारादि–प्रत्यये परे, धात्वन्तस्य हकारस्य स्थाने ढकारादेशो भवति, **हो ढः** इत्यनेन सूत्रेण |
- तदा ढकारस्य स्थाने ककारादेशो भवति **षढोः कः सि** इत्यनेन सूत्रेण |
- अन्ते प्रत्ययावयवस्य सकारस्य स्थाने षकारादेशो भवति, **आदेशप्रत्यययोः** इत्यनेन सूत्रेण |

यथा— लिह् + सि → **पुगन्तलघूपधस्य च** → लेह् + सि → **हो ढः** → लेढ् + सि → **षढोः कः सि** → लेक् + सि → **आदेशप्रत्यययोः** → लेक् + षि → लेक्षि

**हो ढः** (८.२.३१) = हकारस्य स्थाने ढकारादेशो भवति झलि पदान्ते च | हः षष्ठ्यन्तं, ढः प्रथमान्तं, द्विपदमिदं सूत्रम् | **झलो झलि** (८.२.२६) इत्यस्मात् **झलि** इत्यस्य अनुवृत्तिः | **स्कोः संयोगाद्योरन्ते च** (८.२.२९) इत्यस्मात् **अन्ते**, **च** इत्यनयोः अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **हः ढः झलि पदस्य अन्ते च** |

**षढोः कः सि** (८.२.४१) = सकारे परे षकारस्य ढकारस्य च ककारादेशो भवति | षश्च ढश्च तयोः इतरेतरद्वन्द्वः षढौ, तयोः षढोः | षढोः षष्ठ्यन्तं, कः प्रथमान्तं, सि सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णम्— **षढोः कः सि** |

३. <u>हकारान्तधातुतः **ध**कारादि–प्रत्ययानां योजनविधिः</u>

- धकारादि–प्रत्यये परे, धात्वन्तस्य हकारस्य स्थाने ढकारादेशो भवति, **हो ढः** इत्यनेन सूत्रेण |
- प्रत्ययादौ स्थितस्य धकारस्य स्थाने ढ्–आदेशो भवति **ष्टुना ष्टुः** इति सूत्रेण |

- पूर्वतनस्य ढ्–लोपो भवति **ढो ढे लोपः** इति सूत्रेण ।
- ढलोपनिमित्तस्य पूर्वस्य अणः दीर्घः भवति **ढ्रलोपे पूर्वस्य दीर्घोऽणः** इति सूत्रेण ।

यथा—
लिह् + हि → **हुझल्भ्यो हेर्धिः** → लिह् + धि → **हो ढः** इत्यनेन झलि परे ह्–स्थाने ढ्–आदेशः → लिढ् + धि → **ष्टुना ष्टुः** इत्यनेन ष्टुत्वम् → लिढ् + ढि → **ढो ढे लोपः** इत्यनेन पूर्वतनस्य ढकारस्य लोपः → लि + ढि → **ढ्रलोपे पूर्वस्य दीर्घोऽणः** इत्यनेन ढ् इत्यस्य लोपानन्तरं पूर्वस्थितस्य अणः दीर्घादेशः → ली + ढि → लीढि
लिह् + ध्वे → **हो ढः** → लिढ् + ध्वे → **ष्टुना ष्टुः** → लिढ् + ढ्वे → **ढो ढे लोपः** → लि + ढ्वे → **ढ्रलोपे पूर्वस्य दीर्घोऽणः** → ली + ढ्वे → लीढ्वे

**हो ढः** (८.२.३१) = हकारस्य स्थाने ढकारादेशो भवति झलि पदान्ते च । हः षष्ठ्यन्तं, ढः प्रथमान्तं, द्विपदमिदं सूत्रम् । **झलो झलि** (८.२.२६) इत्यस्मात् **झलि** इत्यस्य अनुवृत्तिः । **स्कोः संयोगाद्योरन्ते च** (८.२.२९) इत्यस्मात् **अन्ते**, **च** इत्यनयोः अनुवृत्तिः । **पदस्य** (८.१.१६) इत्यस्य अधिकारः । अनुवृत्ति–सहितसूत्रम्— **हः ढः झलि पदस्य अन्ते च** ।

**झषस्तथोर्धोऽधः** (८.२.४०) = झष्–उत्तरस्य तकारथकारयोः स्थाने धकारादेशो भवति, धा–धातुं वर्जयित्वा । तस्च थ् च तथौ इतरेतरद्वन्द्वः; तयोः, तथोः । तकारोत्तर–अकारः उच्चारणार्थम् अस्ति; अग्रे 'धः' इत्यस्य धकारोत्तर–अकारः अपि तथ । न धा, अधा नञ्तत्पुरुषः, तस्मात् अधः । झषः पञ्चम्यन्तं, तथोः षष्ठ्यन्तं, धः प्रथमान्तम्, अधः पञ्चम्यन्तम्, अनेकपदमिदं सूत्रम् । सूत्रं स्वयं सम्पूर्णम् — **झषः तथोः धः अधः** ।

**ढो ढे लोपः** (८.३.१३) = ढकारे परे पूर्वतनस्य ढकारस्य लोपो भवति । ढः षष्ठ्यन्तं, ढे सप्तम्यन्तं, लोपः प्रथमान्तं, त्रिपदमिदं सूत्रम् । सूत्रं स्वयं सम्पूर्णम्— **ढः ढे लोपः** ।

**ढ्रलोपे पूर्वस्य दीर्घोऽणः** (६.३.१११) = ढरेफयोर्लोपनिमित्तयोः पूर्वस्याणो दीर्घः । ढकाररेफयोः लोपस्य निमित्तकढकाररेफे परे, अण्–प्रत्याहारे स्थितस्य दीर्घादेशो भवति । ढ्रलोपे इति द्वन्द्वगर्भ–उपपदतत्पुरुषसमासः— ढ् च ्र च ढ्रौ, इतरेतरद्वन्द्वः, ढ्रौ लोपयतीति ढ्रलोपः, तस्मिन् ढ्रलोपे । ढ्रलोपः गर्भद्वन्द्वः उपपदतत्पुरुषः । ढ्रलोपे सप्तम्यन्तं, पूर्वस्य षष्ठ्यन्तं, दीर्घः प्रथमान्तम्, अणः षष्ठ्यन्तम्, अनेकपदमिदं सूत्रम् । सूत्रं स्वयं सम्पूरणम्— **ढ्रलोपे पूर्वस्य अणः दीर्घः** ।

लङि—
अलिह् + त् → **पुगन्तलघूपधस्य च** → अलेह् + त् → हल्–परतः अपृक्तसंज्ञक–प्रत्ययस्य लोपः → अलेह् → **हो ढः** → अलेढ् → **झलां जशोऽन्ते** → अलेड् → **वाऽवसाने** इत्यनेन विकल्पेन चर्त्वादिशः → अलेट्

**हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** (६.१.६८, लघु० १७९) = हल्–परतः अपृक्तसंज्ञक–प्रत्ययस्य लोपः । लङि त्–लोपः, स्–लोपश्च ।

परस्मैपदे आत्मनेपदे च—
अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि । उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु ।

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

<u>अदादिगणस्य रुदाद्यन्तर्गणः</u> (पञ्च धातवः)

रुदिँर् (अश्रुविमोचने)→ रुद् → रोदिति
अन (प्राणने) → अन् → अनिति

ञिष्वप् (शये) → स्वप् → स्वपिति
श्वस (प्राणने) → श्वस् → श्वसिति
जक्ष (भक्षहसनयोः) → जक्ष् → जक्षिति

**रुदादिभ्यः सार्वधातुके** (७.२.७६) = रुदादिगणे पठितेभ्यः धातुभ्यः वलादेः सार्वधातुकस्य इडागमो भवति | वल्–प्रत्याहारः आदौ यस्य सः वलादिः | वल्–प्रत्याहारस्य अन्तर्गतेषु वर्णेषु तिङ्–प्रत्ययानाम् आदौ त्, थ्, ध्, म्, व्, स् एते एव भवन्ति | रुदादिभ्यः पञ्चम्यन्तं, सार्वधातुके सप्तम्यन्तं, द्विपदमिदं सूत्रम् | **आर्धधातुकस्येड् वलादेः** (७.२.३५) इत्यस्मात् **इट्**, **वलादेः** इत्यनयोः अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **रुदादिभ्यः अङ्गेभ्यः इट् वलादौ सार्वधातुके** |

यथा—
रुद् + ति → रोद् + ति → रोद् + इ + ति → रोदिति
अन् + ति → अन् + इ + ति → अनिति
स्वप् + ति → स्वप् + इ + ति → स्वपिति
श्वस् + ति → श्वस् + इ + त → श्वसिति
जक्ष् + ति → जक्ष् + इ + ति → जक्षिति

लङि—
विकल्पेन अरोदीत्, अरोदत् |

१. **रुदश्च पञ्चभ्यः** (७.३.९८) = पञ्चभ्यः रुदादिभ्यः धातुभ्यः हलादेः पितः अपृक्तस्य सार्वधातुकस्य ईडागमो भवति | रुदः पञ्चम्यन्तं, पञ्चभ्यः पञ्चम्यन्तं, च अव्ययं, त्रिपदमिदं सूत्रम् | **नाभ्यस्तस्याचि पिति सार्वधातुके** (७.३.८७) इत्यस्मात् **पिति**, **सार्वधातुके** इत्यनयोः अनुवृत्तिः | **उतो वृद्धिर्लुकि हलि** (७.३.८९) इत्यस्मात् **हलि** इत्यस्य अनुवृत्तिः | **गुणोऽपृक्ते** (७.३.९१) इत्यस्मात् **अपृक्ते** इत्यस्य अनुवृत्तिः | **ब्रुव ईट्** (७.३.९३) इत्यस्मात् **ईट्** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **रुदश्च पञ्चभ्यः अङ्गेभ्यः ईट् हलि पिति अपृक्ते सार्वधातुके** |

यथा—
अरुद् + त् → **रुदश्च पञ्चभ्यः** (७.३.९८) → अरुद् + ईट् + त् → अरुद् + ईत् → **पुगन्तलघूपधस्य च** (७.३.८६) → अरोद् + ईत् → अरोदीत्

अत्र ईडागमस्य विधानेन अधुना प्रत्ययः ईत्, नाम द्विवर्णकः, अतः अपृक्त–संज्ञा नास्ति; तदभावे **हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** (६.१.६७) इत्यस्य प्रसक्तिर्नास्ति | अरुद् + स् → अरोदीः अपि तथा |

२. **अड् गार्ग्यगालवयोः** (७.३.९९) = पञ्चभ्यः रुदादिभ्यः धातुभ्यः हलादेः पितः सार्वधातुकस्य अपृक्तस्य अडागमो भवति, गार्ग्यगालवयोः मतेन | गार्ग्यश्च गालवश्च गार्ग्यगालवौ, तयोः गार्ग्यगालवयोः | अट् प्रथमान्तं, गार्ग्यगालवयोः षष्ठ्यन्तं, द्विपदमिदं सूत्रम् | **नाभ्यस्तस्याचि पिति सार्वधातुके** (७.३.८७) इत्यस्मात् **पिति**, **सार्वधातुके** इत्यनयोः अनुवृत्तिः | **उतो वृद्धिर्लुकि हलि** (७.३.८९) इत्यस्मात् **हलि** इत्यस्य अनुवृत्तिः | **गुणोऽपृक्ते** (७.३.९१) इत्यस्मात् **अपृक्ते** इत्यस्य अनुवृत्तिः | **रुदश्च पञ्चभ्यः** (७.३.९८) इत्यस्मात् **रुदश्च**, **पञ्चभ्यः** इत्यनयोः अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **गार्ग्यगालवयोः रुदश्च पञ्चभ्यः अङ्गेभ्यः अट् हलि पिति अपृक्ते सार्वधातुके** |

यथा—
अरुद् + त् → **पुगन्तलघूपधस्य च** (७.३.८६) → अरोद् + त् → **अड् गार्ग्यगालवयोः** (७.३.९९) → अरोद् + अ + त् → अरोदत् |
अरोद् + स् → अरोद् + अ + स् → अरोदः अपि तथा |

| | | त्–प्रत्यये परे | स्–प्रत्यये परे |
|---|---|---|---|
| रुद् → | अरोद् → | अरोदीत्, अरोदत् | अरोदीः, अरोदः |
| स्वप् → | अस्वप् → | अस्वपीत्, अस्वपत् | अस्वपीः, अस्वपः |
| श्वस् → | अश्वस् → | अश्वसीत्, अश्वसत् | अश्वसीः, अश्वसः |
| अन् → | आन् → | आनीत्, आनत् | आनीः, आनः |

जक्ष् → अजक्ष् → अजक्षीत्, अजक्षत् अजक्षीः, अजक्षः

<u>दकारान्तः रुद → रुद् धातुः</u> (परस्मैपदी, अश्रुविमोचने)

a) अङ्गकार्यम्—
१) हलादि पित्सु = उपधायां लघु–इकः गुणः | रुद् + ति → **पुगन्तलघूपधस्य च** → रोद् + ति → इडागमः → रोदिति
२) अजादि पित्सु = उपधायां लघु–इकः गुणः | रुद् + आनि → **पुगन्तलघूपधस्य च** → रोद् + आनि → रोदानि
३) हलाद्यपित्सु = **क्ङिति च**, गुणनिषेधः | रुद् + तः → इडागमः → रुदितः
४) अजाद्यपित्सु = **क्ङिति च**, गुणनिषेधः | रुद् + अन्ति → वर्णमेलनमेव → रुदन्ति

b) सन्धिकार्यम्—
वलादि–प्रत्ययेषु इडागमो भवति अतः हल्–सन्धेः अवसरो न कुत्रापि भवति |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

<u>पकारान्तः ञिष्वप् → स्वप्</u> (परस्मैपदी, शये)

a) अङ्गकार्यम्— उपधायां ह्रस्व–अकारः (लघु इक् इति न) अतः गुणकार्यं नास्ति | वलादि–प्रत्यये परे इडागमो भवति, अपि च लङ्–लकारे अपृक्तसंज्ञक–प्रत्ययेषु ईडागमश्च अडागमश्च भवतः |

b) सन्धिकार्यम्— वलादि–प्रत्ययेषु इडागमो भवति अतः हल्–सन्धेः अवसरो न कुत्रापि भवति |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

<u>सकारान्तः श्वस → श्वस्</u> (परस्मैपदी, प्राणने)

a) अङ्गकार्यम्— उपधायां ह्रस्व–अकारः (लघु इक् इति न) अतः गुणकार्यं नास्ति | वलादि–प्रत्यये परे इडागमो भवति, अपि च लङ्–लकारे अपृक्तसंज्ञक–प्रत्ययेषु ईडागमश्च अडागमश्च भवतः |

b) सन्धिकार्यम्— वलादि–प्रत्ययेषु इडागमो भवति अतः हल्–सन्धेः अवसरो न कुत्रापि भवति

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—

लङि—
विधिलिङि—

<u>अदादिगणस्य जक्षाद्यन्तर्गणः</u> (सप्त धातवः)

**जक्षित्यादयः षट्** (६.१.६) = जक्षित्यादीनां धातूनाम् अभ्यस्त-संज्ञा भवति | अदादिगणे एकः अन्तर्गणः वर्तते यस्मिन् सप्त धातवः सन्ति — जक्ष्, जागृ, दरिद्रा, चकास्, शास्, दीधीङ्, वेवीङ् च | इति-शब्देन जक्ष्-धातोः परामर्शः | इति आदिः येषां ते इत्यादयः बहुव्रीहिः | जक्ष् प्रथमान्तम्, इत्यादयः प्रथमान्तं, षट् प्रथमान्तं, त्रिपदमिदं सूत्रम् | **उभे अभ्यस्तम्** (६.१.५) इत्यस्मात् **अभ्यस्तम्** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्— **जक्षित्यादयः षट् अभ्यस्तम् |**

**उभे अभ्यस्तम्** (६.१.५) इति सूत्रेण यदा धातोः द्वित्वं भवति, तदा मिलित्वा द्वयोः भागयोः नाम 'अभ्यस्तं' भवति | **जक्षित्यादयः षट्** (६.१.६) इत्यनेन जक्षित्यादीनां धातूनाम् अद्वित्वे सत्यपि अभ्यस्त-संज्ञा भवति |

एषां सप्तानां धातूनां तिङन्तसिद्ध्यर्थं विशिष्टे द्वे कार्ये—

१) **अदभ्यस्तात्** (७.१.४) = अभ्यस्तसंज्ञक-धातूत्तरस्य प्रत्ययस्य आदिमावयवस्य झकारस्य स्थाने अत्-आदेशो भवति | अत् प्रथमान्तम्, अभ्यस्तात् पञ्चम्यन्तं, द्विपदमिदं सूत्रम् | **झोऽन्तः** (७.१.३) इत्यस्मात् **झः** (षष्ठ्यन्तम्) इत्यस्य अनुवृत्तिः | **आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्** (७.१.२) इत्यस्मात्, वचनपरिणामं कृत्वा **प्रत्ययादेः** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्— **अभ्यस्तात् अङ्गात् प्रत्ययादेः झः अत् |**

धेयं यत् अत्-आदेशस्य तकारः **हलन्त्यम्** (१.३.३) इति सूत्रेण इत्-संज्ञकः न, यतोहि अत् तु विभक्तिसंज्ञक-झि-प्रत्ययस्य अवयवस्य आदेशः अतः **न विभक्तौ तुस्माः** (१.३.४) इत्यनेन **हलन्त्यम्** (१.३.३) बाधितम् |

**अदभ्यस्तात्** (७.१.४) इति सूत्रेण लटि लोटि च प्रथमपुरुषस्य बहुवचने झ्-स्थाने अत् आदेशः, अतः लटि झि → अति न तु अन्ति; लोटि झि → अतु न तु अन्तु |

२) **सिजभ्यस्तविदिभ्यश्च** (३.४.१०९) = ङित्-लकारस्य अवस्थायां, सिच्-प्रत्ययात्, अभ्यस्तसंज्ञकात् धातोः, विद्-धातोः च, परस्य झि-प्रत्ययस्य स्थाने जुस्-आदेशो भवति | सिच् च अभ्यस्तश्च विदिश्च तेषामितरेतरद्वन्द्वः सिजभ्यस्तविदयः, तेभ्यः सिजभ्यस्तविदिभ्यः | सिजभ्यस्तविदिभ्यः पञ्चम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **नित्यं ङितः** (३.४.९९) इत्यस्मात् **ङितः** इत्यस्य अनुवृत्तिः | **झेर्जुस्** (३.४.१०८) इत्यस्मात् **झेः जुस्** इत्यनयोः अनुवृत्तिः | **लस्य** (३.४.७७) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्—
**सिजभ्यस्तविदिभ्यः च ङितः लस्य झेः जुस् |**

अनेन लङि अभ्यस्तसंज्ञकधातोः परस्य झि-स्थाने जुस्-आदेशः | जुस् इत्यस्य अनुबन्धलोपे, रुत्वविसर्गौ, उः इति भवति | तर्हि आहत्य अभ्यस्तसंज्ञकः धातुः अस्ति चेत्, लङि अन्-स्थाने उः इति प्रत्ययः भवति |

एषु सप्तसु जक्षाद्यन्तर्गणीयेषु धातुषु चत्वारः अजन्तः— जागृ, दरिद्रा, दीधीङ्, वेवीङ् चेत्येषां रूपाणि अस्माभिः साधितानि अदादिगणस्य अजन्तानां पाठे | त्रयः च हलन्ताः— जक्ष्, चकास्, शास्; एषां रूपाणि अधुना साधनीयानि—

<u>षकारान्तः जक्ष → जक्ष्</u> (परस्मैपदी, भक्षहसनयोः)

जक्ष्-धातुः रुदाद्यन्तर्गणेऽपि अस्ति, जक्षाद्यन्तर्गणेऽपि अस्ति | अतः धेयं यत् अत्र द्वयोः अन्तर्गणयोः कार्यं भवति |

a) अङ्गकार्यम्— उपधायां ककारः (लघु इक् इति न) अतः गुणकार्यं नास्ति | वलादि-प्रत्यये परे इडागमो भवति, अपि च लङ्-लकारे अपृक्तसंज्ञक-प्रत्ययेषु ईडागमश्च अडागमश्च भवतः |

b) सन्धिकार्यम्— वलादि-प्रत्ययेषु इडागमो भवति अतः हल्-सन्धेः अवसरो न कुत्रापि भवति |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप-चिन्तनं करोतु |

रूपाणि
लटि —
लोटि—
लङि—
विधिलिङि—

सकारान्तः चकासृ → चकास् (परस्मैपदी, दीप्तौ)

चकास्–धातुः जक्षाद्यन्तर्गणे अस्ति, अतः तिङन्तसिद्ध्यर्थं विशिष्टे द्वे कार्ये मनसि निधाय रूपाणि प्रवर्तनीयानि |

a) अङ्गकार्यम्— उपधायाम् आकारः (लघु इक् इति न) अतः गुणकार्यं नास्ति |

लोटि—
**हुझल्भ्यो हेर्धिः** (६.४.१०१) इत्यनेन झलन्तेभ्यः धातुभ्यशः हि–प्रत्ययस्य स्थाने धि–आदेशः |

चकास् + हि → **हुझल्भ्यो हेर्धिः** (६.४.१०१) → चकास् + धि

b) सन्धिकार्यम्—

लोटि—

**धि च** (८.२.२५) इत्यनेन सकारस्य लोपो भवति धकारादि–प्रत्यये परे |

चकास् + हि → **हुझल्भ्यो हेर्धिः** (६.४.१०१) → चकास् + धि → **धि च** (८.२.२५) इत्यनेन स्–लोपः → चकाधि

**धि च** (८.२.२५) = सकारस्य लोपो भवति धकारादि–प्रत्यये परे | धि सप्तम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **रात्सस्य** (८.२.२४) इत्यस्मात् **सस्य** इत्यस्य अनुवृत्तिः | **संयोगान्तस्य लोपः** (८.२.२३) इत्यस्मात् **लोपः** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **धि च सस्य लोपः** |

**हुझल्भ्यो हेर्धिः** (६.४.१०१) = हु–धातुतः झलन्तेभ्यः धातुभ्यश्च हि–प्रत्ययस्य स्थाने धि–आदेशो भवति | **येनविधिस्तदन्तस्य** (१.१.७२) इत्यनेन झलेभ्यः इति विशेषणेन तेभ्यः अङ्गेभ्यः येषाम् अन्ते झल् | हुश्च झलश्च तेषामितरेतरद्वन्द्वो हुझलः, तेभ्यो हुझल्भ्यः | हुझल्भ्यः पञ्चम्यन्तं, हेः षष्ठ्यन्तं, धिः प्रथमान्तं, त्रिपदमिदं सूत्रम् | **अङ्गस्य** (६.४.११) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **हुझल्भ्यः अङ्गेभ्यः हेः धिः** |

लङि—

**हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** (६.१.६८) इत्यनेन हल्–उत्तरस्य अपृक्तसंज्ञक–प्रत्ययस्य लोपः | लङि त्–लोपः, स्–लोपश्च |

अचकास् + त् → **हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** → चकास् → **तिप्यनस्तेः** इत्यनेन पदान्तस्य सकारस्य दकारादेशः → अचकाद्
अचकास् + त् → उपरि इव → अचकाद् → **वाऽवसाने** इत्यनेन विकल्पेन पदान्ते चर्त्वादिशः → अचकात्

**तिप्यनस्तेः** (८.२.७३) = पदान्तस्य सकारस्य दकारादेशो भवति तिपि परे; परन्तु अस्–धातौ न भवति | इदं सूत्रं **ससजुषो रुः** (८.२.६६) इत्यस्य अपवादः | न अस्तिः अनस्तिः, तस्य अनस्तेः | तिपि सप्तम्यन्तम्, अनस्तेः षष्ठ्यन्तं, द्विपदमिदं सूत्रम् | **ससजुषोः रुः** (८.२.६६) इत्यस्मात् **सः** इत्यस्य अनुवृत्तिः | **वसुस्रंसुध्वंस्वनडुहां दः** (८.२.७२) इत्यस्मात् **दः** इत्यस्य अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **पदस्य सः दः तिपि अनस्तेः** |

**ससजुषो रुः** (८.२.६६) = पदान्ते सकारस्य च सजुष्–शब्दस्य षकारस्य च स्थाने रु–आदेशो भवति | **अलोऽन्त्यस्य** (१.१.५२)

इत्यनेन पदान्तस्य वर्णस्य स्थाने रु–आदेशः | सश्च सजुश्च ससजुषौ, इतरेतरद्वन्द्वः, तयोः ससजुषोः | ससजुषोः षष्ठ्यन्तम्, रुः प्रथमान्तम्, द्विपदमिदं सूत्रम् | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **ससजुषोः पदस्य रुः** |

अत्र वस्तुतः **झलां जशोऽन्ते** (८.२.३९) इति अत्र सर्वसामान्यं सूत्रं; तस्य अपवादः **ससजुषो रुः** (८.२.६६); पुनः **ससजुषो रुः** इत्यस्य अपवादः **तिप्यनस्तेः** (८.२.७३) |

<u>सिपि रुत्वं दत्वं वा</u>

**सिपि धातो रुर्वा** (८.२.७४) = पदान्तस्य सकारस्य रु–आदेशो भवति, दकारो वा, सिपि परे | अत्र 'वा' इति समुच्चयार्थे | **येनविधिस्तदन्तस्य** (१.१.७२ ) इत्यनेन तदन्तविधिः; **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अन्तिमवर्णादेशः | '**धातोः**' उक्तं परसूत्राणाम् अर्थपूर्तिकृते; प्रकृतसूत्रे आवश्यकता नास्ति | सिपि सप्तम्यन्तं, धातोः षष्ठ्यन्तं, रुः प्रथमान्तं, वा अव्ययपदम्, अनेकपदमिदं सूत्रम् | **ससजुषोः रुः** (८.२.६६) इत्यस्मात् **सः** इत्यस्य अनुवृत्तिः | **वसुस्रंसुध्वंस्वनडुहां दः** (८.२.७२) इत्यस्मात् **दः** इत्यस्य अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रं— **सः धातोः पदस्य रुः दः वा सिपि** |

प्राचीनैः उच्यते यत् **वसुस्रंसुध्वंस्वनडुहां दः** (८.२.७२) इत्यस्मात् **दः** इत्यस्य अनुवृत्त्या दकारस्य पक्षः सिध्यति साक्षात् अनेन एव **सिपि धातो रुर्वा** (८.२.७४) इति सूत्रेण | नवीनैः उच्यते यत् अस्यावश्यकता नास्ति यतोहि रु–अपक्षे स्–स्थाने दकारादेशः **झलां जशोऽन्ते** (८.२.३९) इत्यनेन | परन्तु अद्यत्वे आधिक्येन वैयाकरणाः वदन्ति यत् **ससजुषोः रुः** (८.२.६६), **झलां जशोऽन्ते** (८.२.३९) इत्यनयोर्मध्ये **ससजुषोः रुः** (८.२.६६) इत्यस्य अपवादभूतत्वात् **झलां जशोऽन्ते** (८.२.३९) इत्यस्य पुनः नितराम् अवकाशो नास्ति | इत्थञ्च **सिपि धातो रुर्वा** (८.२.७४) इत्यनेनैव रुश्च दश्च क्रियते |

अनेन सूत्रेण लङ्–लकारस्य स्–प्रत्यये परे सकारान्तपदस्य सकारस्य स्थाने विकल्पेन दकारादेशः रुत्वं वा भवति | यथा—

अचकास् + स् → **हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** इत्यनेन स्–लोपः → अचकास् → **सिपि धातो रुर्वा** (८.२.७४) इत्यनेन विकल्पेन रु–आदेशः → अचकाद् / अचकारु → अचकारु चेत् उ इत्यस्य इत्–संज्ञा लोपश्च, **खरवसानयोर्विसर्जनीयः** (८.३.१५) इत्यनेन अवसाने‸–स्थाने विसर्गादेशः → अचकाः // पुनः अचकाद् → **वाऽवसाने** इत्यनेन विकल्पेन चर्–आदेशः → अचकात् इति कृत्वा त्रीणि रूपाणि

अत्र दृष्टिः एवं— सकारान्तपदम् अस्ति चेत्, कीदृशं कार्यं स्यात् इति प्रश्नः | अस्मिन् प्रसङ्गे सर्वसामान्यं सूत्रं **झलां जशोऽन्ते** (८.२.३९) | सकारः झलि अस्ति; अनेन सूत्रेण पदान्ते सकारस्य जश्त्वं, नाम वर्गीयव्यञ्जनस्य तृतीयसदस्यः | **स्थानेऽन्तरतमः** (१.१.५०) इत्यनेन दन्त्य–सकारस्य स्थाने दन्त्य–तवर्गस्य तृतीयसदस्यः दकारः भवति | अतः सर्वसामान्य–सिद्धान्तः पदान्ते सकारस्य स्थाने दकारादेशः | परन्तु **ससजुषो रुः** (८.२.६६) तस्य अपवादः | अनेन पदान्ते स्थितस्य सकारस्य स्थाने रु–आदेशो भवति | पुनः तिप्–प्रत्यये परे **तिप्यनस्तेः** (८.२.७३) तस्य अपवादः | अनेन तिपि परे पदान्तस्य सकारस्य दकारादेशो भवति | एवमेव सिप्–प्रत्यये परे **सिपि धातो रुर्वा** (८.२.७४) **ससजुषो रुः** (८.२.६६) इत्यस्य अपवादः | अनेन सिपि परे पदान्तस्य सकारस्य रु–आदेशो दकारादेशश्च भवति | यथोक्तं **झलां जशोऽन्ते** (८.२.३९) इत्यनेन स्–स्थाने दकारः नोपलभ्यते यतोहि तत्तु बाधितं **ससजुषो रुः** (८.२.६६) इति सूत्रेण |

प्रश्नः उदेति यत् सिप् यदा आगतः तदा कथं वा धातुसंज्ञा स्यात् ? **सिपि धातो रुर्वा** (८.२.७४) इति सूत्रेण 'धातोः' अपि उक्तं, 'सिपि' अपि उक्तम् | अत्र वार्ता एवं— कस्य भागस्य का संज्ञा ? 'वस + ति' इति स्थितौ 'वस' इति अङ्गस्य धातुसंज्ञा नास्ति; तत्र किन्तु 'वस्' इति अन्तर्निहितभागस्य धातुसंज्ञा तु तदानीमपि अस्त्येव | एवमेव सिपः विधानानन्तरमपि धातोः धातुसंज्ञा तिष्ठति | यथा 'अचकास् + स्' इत्यत्र 'अचकास् + स्' इत्यस्य पदसंज्ञा, 'अचकास्' इत्यस्य धातुसंज्ञा | तदा स्–प्रत्ययलोपानन्तरम्, 'अचकास्' इत्यस्य धातुसंज्ञा अपि भवति, पदसंज्ञा अपि भवति |

**खरवसानयोर्विसर्जनीयः** (८.३.१५) = पदान्ते स्थितस्य रेफस्य स्थाने विसर्गादेशो भवति खरि अवसाने च परे | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन रेफान्तस्य पदस्य; **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन पदान्तस्य रेफस्य स्थाने विसर्गादेशः | खर् च अवसानं च तयोरितरेतरयोगद्वन्द्वः खरवसाने, तयोः खरवसानयोः | खरवसानयोः सप्तम्यन्तं, विसर्जनीयः प्रथमान्तं, द्विपदमिदं सूत्रम् | **रो रि** (८.३.१४) इत्यस्मात् **रः** इत्यस्य अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **रः पदस्य विसर्जनीयः खरवसानयोः संहितायाम्** |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

रूपाणि
लटि —
लोटि—
लङि—
विधिलिङि—

सकारान्तः शासु → शास् (परस्मैपदी, अनुशिष्टौ)

शास्–धातुः जक्षाद्यन्तर्गणे अस्ति, अतः तिङन्तसिद्ध्यर्थं विशिष्टे द्वे कार्ये मनसि निधाय रूपाणि प्रवर्तनीयानि |

a) अङ्गकार्यम्— उपधायाम् आकारः (लघु इक् इति न) अतः गुणकार्यं नास्ति | किन्तु अन्यत् अङ्गकार्यद्वयं वर्तते—

१. शास्–धातोः स्थाने शा–आदेशो भवति हि–प्रत्यये परे |

**शा हौ** (६.४.३५) = शास्–धातोः स्थाने शा–आदेशो भवति हि–प्रत्यये परे | शा लुप्तप्रथमाकं, हौ सप्तम्यन्तं, द्विपदमिदं सूत्रम् | **शास इदङ्हलोः** (६.४.३४) इत्यस्मात् **शासः** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **शासः शा हौ** |

यथा—
शास् + हि → **शा हौ** (६.४.३५) → शा + हि → **हुझल्भ्यो हेर्धिः** (६.४.१०१) इत्यनेन झलन्तेभ्यः धातुभ्यशः हि–स्थाने धि–आदेशः → शा + धि → शाधि

यदा शा–आदेशो भवति, तदानीं शा झलन्तः नास्ति अतः हि–स्थाने धि न स्यात् | किन्तु **शा हौ** (६.४.३५), **हुझल्भ्यो हेर्धिः** (६.४.१०१) इत्याभ्यां यत् कार्यं सिध्यति, उभयत्र तत् कार्यं आभीयकार्यम् | द्वाभ्यां च सूत्राभ्यां यत् कार्यं विधीयते, तस्य कार्यस्य आश्रयः 'हि'–प्रत्ययः | अतः एकवारं यदा एकम् हि–प्रत्ययाश्रितम् आभीयकार्यं जातं, तदा यदा द्वितीयं हि–प्रत्ययाश्रितम् आभीयकार्यं विधीयते, तत् कार्यं प्रति प्रथमम् आभीयकार्यं असिद्धं भवति | अस्याः सम्पूर्णप्रक्रियायाः बोधार्थम् अग्रे स्थानिवद्भावपाठे द्रष्टव्यम् |

**असिद्धवदत्राभात्** (६.४.२२) = कमपि आश्रयम् अधिकृत्य आभीय–कार्यं, द्वितीयं समानाश्रितम् आभीय–कार्यं प्रति असिद्धं भवति | अधिकारसूत्रम् | **भस्य** (६.४.१२९) इति अधिकारसूत्रेण भ–संज्ञा सम्बद्धकार्याणि भवन्ति षष्ठाध्ययस्य अन्तपर्यन्तम् | **असिद्धवदत्राभात्** (६.४.२२) इत्यनेन ६.४.२३ इत्यस्मात् आरभ्य, **भस्य** इत्यस्य अधिकारस्य अन्तपर्यन्तम्, एषां कार्याणां नाम आभीय–कार्यम् | सूत्रं स्वयं सम्पूर्णम्— **असिद्धवत् अत्र आ भात्** |

२. शास्–धातोः उपधायाः ह्रस्व–इकारादेशो भवति हलादि किति ङिति प्रत्यये परे |

**शास इदङ्हलोः** (६.४.३४) = शास्–धातोः उपधायाः ह्रस्व–इकारादेशो भवति अङ्–प्रत्यये, हलादि किति ङिति च प्रत्यये परे | अङ्–प्रत्ययः लुङ्–लकारे भवति | **यस्मिन् विधिस्तदादावल्ग्रहणे** (१.१.७२, वार्तिकम् २९) इत्यनेन हलि इत्युक्तौ हलादि–प्रत्यये (तादृशप्रत्ययः यस्य आदौ हल् स्यात्) | क्ङिति विशेषणं, हलि इत्यस्य | अङ् च हल् च अङ्हलौ इतरेतरद्वन्द्वः, तयोः अङ्हलोः | शासः षष्ठ्यन्तम्, इत् प्रथमान्तम्, अङ्हलोः सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | **अनिदितां हल उपधाया क्ङिति** (६.४.२४) इत्यस्मात् उपधायाः, क्ङिति इत्यनयोः अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकाराः | अनुवृत्ति–सहितसूत्रम्— **शासः अङ्गस्य उपधायाः इत् क्ङिति अङ्हलोः** |

यथा—
शास् + तः → **शास इदङ्हलोः** (६.४.३४) → शिस् + तः

b) सन्धिकार्यम्—

**शासिवसिघसीनाम् च** (८.३.६०) = शस्, वस्, घस् इत्येषां धातूनां इण्–प्रत्याहारोत्तरस्य कवर्गीयोत्तरस्य च सकारस्य स्थाने षकारादेशो

भवति | सकारः आदेशस्य प्रत्ययस्य च अवयवः नास्ति इति कारणेन **आदेशप्रत्यययोः** (८.३.५९) इत्यस्य प्रसक्तिर्नास्ति; तस्मात् अस्य सूत्रस्य आवश्यकता | शासिश्च वसिश्च घसिश्च तेषामितरेतरद्वन्द्वः शासिवसिघसयः, तेषां शासिवसिघसीनाम् | शासिवसिघसीनां षष्ठ्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **अपदान्तस्य मूर्धन्यः** (८.३.५५) इत्यस्मात् **मूर्धन्यः** इत्यस्य अनुवृत्तिः | **इण्कोः** (८.३.५७) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **शासिवसिघसीनाम् च मूर्धन्यः इण्कोः |**

यथा—
शिस् + तः → **शासिवसिघसीनाम् च** (८.३.६०) → शिष् + तः → **ष्टुना ष्टुः** (८.४.४१) इत्यनेन ष्टुत्वम् → शिष्टः

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप-चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

अनेन अदादिगणस्य हलन्तधातवः समाप्ताः |

Swarup — December 2013 (updated Sept 2016)